Ananth's Vedha Group ®

# Veda & Sloka Book (Sanskrit)

This is a special edition book for Sri Maharudram, in the Washington DC Metropolitan Area by Ananth's Vedha Group conducted as part of Peetarohana Centenary Celebrations of His Holiness Sri Sri Sri Chandrasekhara Bharati Mahaswami.
April 27-29, 2012.



His Holiness Sri Sri Sri Bharati Tirtha Mahaswami.

Hari OM

Sadasiva samarambham
Sankaracharya madhyamam
Asmadacharya paryantam
Vande guru paramparam

This book is dedicated, with blessings from His Holiness Sri Sri Sri Bharati Tirtha Mahaswami, to our Guru Sri Ananth Krishnan and our Mother Smt Meena Ananth Krishnan. We thank both of them with all our hearts for the invaluable service they have done to propagate and safeguard the dharmic ideals and values preached by our Acharyas.

**Special Thanks:**

This book would not have been possible without two people – Smt Lalitha Seshan and Sri Seshan. We cannot thank them enough for exemplary service they have done by typing all the Veda Mantras and Slokas in many Indian languages for the Sri MahaRudram and for the Ananth's Vedha Group over the last 20 years. We are ever indebted to them.

## Guruvandanam

ॐ श्रीमत्–परमहंस–परिव्राजकाचार्यवर्य
पदवाक्य–प्रमाण–पारावार–पारीण
यमनियमासन–प्राणायाम–प्रत्याहार
धारणाध्यान–समाध्यष्टाङ्ग–योगानुष्ठाननिष्ट
तपश्चक्रवर्ती
अनाद्यविच्छिन्न–श्रीशङ्कराचार्य–गुरुपरंपराप्राप्त
षड्दर्शन–स्थापनाचार्य
व्याख्यान–सिंहासनाधीश्वर
सकलनिगमागम–सारहृदय
सांख्यत्रय–प्रतिपादक
वैदिकमार्गप्रवर्तक
सर्वतन्त्र–स्वतन्त्र
आदिराजधानी–विद्यानगर–महाराजधानी
कर्णाटक–सिंहासन–प्रतिष्ठापनाचार्य
श्रीमद्–राजाधिराजगुरु–भूमण्डलाचार्य
ऋष्यशृङ्गपुरवराधीश्वर–तुङ्गभद्रातीरवासी
श्रीमद्–विद्याशङ्कर–पादपद्माराधक
श्रीमद्–जगद्गुरु श्रीमद्–अभिनवविध्यातीर्थमहास्वामि
गुरुकरकमल–सञ्जात
श्रीमद्–जगद्गुरु श्री भारती तीर्थमहास्वामिनां
चरणारविन्दयोः साष्टाङ्ग प्रणामान् समर्पयामः ॥

## Sri Ganesha Bhujangam

रणत् क्षुद्रघण्टानिनादाभिरामं
चलत्ताण्डवोद्दण्डवत्पद्मतालम् ।
लसत्तुन्दिलाङ्गो परिव्यालहारं
गणाधीशमीशानसूनुं तमीडे ॥ 1 ॥

ध्वनिध्वंसवीणालयोल्लासि वक्त्रं
स्फुरच्छुण्डदण्डोल्लसद्बीज पूरम् ।
गलद्दर्पसौगन्ध्यलोलालिमालं
गणाधीशमीशानसूनुं तमीडे ॥ 2 ॥

प्रकाशज्जपारक्तरन्तप्रसून-
प्रवालप्रभातारुण ज्योतिरेकम् ।
प्रलम्बोदरं वक्रतुण्डैकदन्तं
गणाधीशमीशानसूनुं तमीडे ॥ 3 ॥

विचित्रस्फुरद्रत्नमालाकिरीटं
किरीटोल्लसच्चन्द्र रेखा विभूषम् ।
विभूषैकभूषं भवध्वंसहेतुं
गणाधीशमीशानसूनुं तमीडे ॥ 4 ॥

उदञ्चद्भुजावल्लरीदृश्यमूलो-
च्चलद्भ्रूलताविभ्रमभ्राजदक्षम् ।
मरुत्सुन्दरीचामरैः सेव्यमानं
गणाधीशमीशानसूनुं तमीडे ॥ 5 ॥

स्फुरन्निष्ठुरालोलपिङ्गाक्षितारं
कृपाकोमलोदार लीलावतारम् ।
कलाबिन्दुगं गीयते योगिवर्यैः
गणाधीशमीशानसूनुं तमीडे ॥ 6 ॥

यमेकाक्षरं निर्मलं निर्विकल्पं
गुणातीतमानन्दमाकारशून्यम् ।
परं पारमोंकारमाम्नाय गर्भं ।
वदन्ति प्रगल्भं पुराणं तमीडे ॥ 7 ॥

चदानन्दसान्द्राय शान्ताय तुभ्यं
नमो विश्वकर्त्रे च हर्त्रे च तुभ्यम् ।
नमोऽनन्तलीलाय कैवल्यभासे
नमो विश्वबीज प्रसीदेशसूनो ॥ 8 ॥

इमं सुस्तवं प्रातरुत्थाय भक्त्या
पठेद्यस्तु मर्त्यो लभेत्सर्वकामान् ।
गणेशप्रसादेन सिध्यन्ति वाचो
गणेशे विभौ दुर्लभं किं प्रसन्ने ॥ 9 ॥

## Sri Sarada Bhujangam

॥ शारदा भुजङ्गम् ॥

सुवक्षोज-कुम्भां सुधापूर्ण-कुम्भां
प्रसादावलम्बां प्रपुण्यावलम्बाम् ।
सदास्येन्दु-बिम्बां सदानोष्ठ-बिम्बां
भजे शारदाम्बां अजस्रं मदम्बाम् ॥ 1॥

कटाक्षे दयार्द्रां करे ज्ञानमुद्रां
कलाभिर्विनिद्रां कलापैः सुभद्राम् ।
पुरस्त्रीं विनिद्रां पुरस्तुङ्गभद्रां
भजे शारदाम्बां अजस्रं मदम्बाम् ॥ 2॥

ललामाङ्कफालां लसद्गानलोलां
स्वभक्तैक-पालां यशःश्रीकपोलाम् ।
करेत्-वक्षमालां कनत्प्रत्नलोलां
भजे शारदाम्बां अजस्रं मदम्बाम् ॥ 3॥

सुसीमन्त-वेणीं दृशा निर्जितैणीं
रमत्-कीरवाणीं नमद्-वज्रपाणीम् ।
सुधा-मन्थरास्यां मुदा चिन्त्यवेणीं
भजे शारदाम्बां अजस्रं मदम्बाम् ॥ 4॥

सुशान्तां सुदेहां दृगन्ते कचान्तां
लसत्–सल्लताङ्गीम्–अनन्तामचिन्त्यां ।
स्मरेत्–तापसैः सङ्ग–पूर्वस्थितां तां
भजे शारदाम्बां अजस्रं मदम्बाम् ॥ 5॥

कुरङ्गे तुरङ्गे मृगेन्द्रे खगेन्द्रे
मराले मदेभे महोक्षेऽधिरूढाम् ।
महत्यां नवम्यां सदा सामरूपां
भजे शारदाम्बां अजस्रं मदम्बाम् ॥ 6॥

ज्वलत्–कान्तिवह्निं जगन्मोहनाङ्गीं
भजे मानसाम्भोज सुभ्रान्त–भृङ्गीं ।
निजस्तोत्र–सङ्गीत–नृत्य–प्रभाङ्गीम्
भजे शारदाम्बां अजस्रं मदम्बाम् ॥ 7॥

भवाम्भोज–नेत्राज सम्पूज्यमानां
लसन्–मन्दहास प्रभा–वक्त्र–चिह्नाम् ।
चलच्–चञ्चला–चारु ताटङ्क–कर्णां
भजे शारदाम्बां अजस्रं मदम्बाम् ॥ 8॥

इति श्रीमत्–परमहंस परिव्राजकाचार्यस्य श्रीगोविन्द–भगवत्–पूज्यपाद–शिष्यस्य
श्री शङ्कर–भगवतः कृतौ शारदा–भुजङ्ग–प्रयाताष्टक संपूर्णम् ॥

## Sri Chandrasekhara Bharati Dhyana Slokam

श्री गुरुभ्यो नमः

ध्यानम्

आसीद्यस्य मनोऽनिशं परशिवे सत्कर्म निम्नातनू
वाणी यस्य मिता स्मितं च मधुरं कारुण्यमन्वादृशम् ।
ज्वालायत्तपसस्तनान नितरं लोकत्रयं विस्मितं
तं वन्दे जयिनं जगद्गुरुवरं ग्लौ शेखर देशिकम् ॥

॥ अनन्त श्री चन्द्रशेखर भारती परमहम्स देवताभ्यो नमः ॥

## Sri Gurupaduka Stotram

॥ श्री गुरुपादुका स्तोत्रं ॥

अनन्त संसार समुद्रतार
नौकायिताभ्यां गुरु भक्तिदाभ्याम् ।
वैराग्य साम्राज्यद पूजनाभ्यां
नमो नमः श्री गुरुपादुकाभ्याम् ॥ 1

कवित्व वाराशिनिशाकराभ्याम्
दौर्भाग्य दावांबुदमालिकाभ्याम् ।
दूरीकृतानम्र विपत्ततिभ्यां
नमो नमः श्री गुरुपादुकाभ्याम् ॥ 2

नता ययोः श्रीपतितां समीयुः
कदाचिदप्याशु दरिद्रवर्याः ।
मूकाश्च वाचस्पतितां हि ताभ्यां
नमो नमः श्री गुरुपादुकाभ्याम् ॥ 3

नालीकनीकाश पदाहृताभ्यां
नाना विमोहादि निवारकाभ्याम् ।
नमज्जनाभीष्टतति प्रदाभ्यां
नमो नमः श्री गुरुपादुकाभ्याम् ॥ 4

नृपालि मौलिव्रज रत्न कान्ति
सरिद्धि राज ज्झष कन्यकाभ्याम् ।
नृपत्वदाभ्याम् नतलोक पंक्तेः
नमो नमः श्री गुरुपादुकाभ्याम् ॥ 5

पापान्धकारार्क परम्पराभ्यां
तापत्रयाहीन्द्र खगेश्वराभ्याम् ।
जाड्याब्धि संशोषण बाडवाभ्यां
नमो नमः श्री गुरुपादुकाभ्याम् ॥ 6

शमादि षट्कप्रद वैभवाभ्याम्
समाधिदान व्रत दीक्षिताभ्याम् ।
रमाधवांघ्रि स्थिर भक्तिदाभ्यां
नमो नमः श्री गुरुपादुकाभ्याम् ॥ 7

स्वार्चापराणामखिलेष्टदाभ्यां
स्वाहा सहायाक्ष धुरन्धराभ्याम् ।
स्वान्ताच्छ भाव प्रद पूजनाभ्यां
नमो नमः श्री गुरुपादुकाभ्याम् ॥ 8

कामादि सर्प व्रज भञ्जकाभ्यां
विवेक वैराग्य निधि प्रदाभ्याम् ।
बोध प्रदाभ्याम् द्रुत मोक्षदाभ्यां
नमो नमः श्री गुरुपादुकाभ्याम् ॥ 9

## Mahanyasam

श्री गुरुभ्यो नमः । हरिः ॐ

अथात पञ्चाङ्ग-रुद्राणां न्यास पूर्वकं जपहोमार्चनाभिषेक-विधिं व्याख्यास्यामः ॥

॥ केशादि पादान्त न्यासः ॥

या ते रुद्र शिवा तनूरघोरापापकाशिनी ।

तया न स्तनुवा शन्तमया गिरिशन्ताभिचाकशीहि॥(शिखायै नमः)॥

अस्मिन् महत्यर्णवे ऽन्तरिक्षे भवा अधि ॥

तेषाग्ं सहस्र-योजनेऽवधन्वानि तन्मसि ॥(शिरसे नमः)॥

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् ।

तेषाग्ं सहस्रयोजने ऽवधन्वानि तन्मसि ॥(ललाटाय नमः)॥

हगंसश्–शुचिषद्–वसुरन्तरिक्ष–सद्धोता वेदिष–दतिथिर्–दुरोणसत् ।

नृषद्वरसद्–ऋतसद्–व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥(भ्रुवोर्मध्याय नमः)

त्र्यंबकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।

उर्वारुकमिव बन्धनान्–मृत्योर्मुक्षीय माऽमृतात् ॥(नेत्राभ्यां नमः)॥

नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च

मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।

वीरान्मानो रुद्र भामितोऽवधी–र्हविष्मन्तो नमसा विधेम ते ॥(नासिकाभ्यां नमः)

अवतत्य धनुस्तवग्ं सहस्राक्ष शतेषुधे ।

निशीर्य शल्यानां मुखा शिवो नः सुमना भव ॥(मुखाय नमः)॥

नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः ॥

तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि ॥(कण्ठाय नमः)॥

नीलग्रीवाः शितिकण्ठा दिवग्ं रुद्रा उपश्रिताः ॥

तेषाग्ं सहस्रयोजने–ऽवधन्वानि तन्मसि ॥(उपकण्ठाय नमः)॥

नमस्ते अस्त्वायुधायानातताय धृष्णवे ।

उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ॥ (बाहुभ्यां नमः) ॥

या ते हेतिर्–मीढुष्टम हस्ते बभूव ते धनुः ।

तयाऽस्मान् विश्वतस्त्व–मयक्ष्मया परिब्भुज ॥(उपबाहुभ्यां नमः)॥

परिणो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः ।

अवस्थिरा मघवद्भ्य–स्तनुष्व मीढ्वस्तोकाय तनयाय मृडय॥(मणिबन्धाभ्यां नमः)॥

ये तीर्थानि प्रचरन्ति सृकावन्तो निषंगिणः ॥

तेषाग्ं सहस्रयोजने–ऽवधन्वानि तन्मसि ॥(हस्ताभ्यां नमः) ॥

सद्योजातं प्रपद्यामि सद्यो जाताय वै नमो नमः ।

भवे भवे नातिभवे भवस्व माम् । भवोद्भवाय नमः ॥ (अंगुष्ठभ्यां नमः) ॥

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय  नमः

कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो

बलप्रमथनाय नमस्सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥(तर्जनीभ्यां नमः)॥

अघोरेभ्योऽथघोरेभ्यो घोरघोर-तरेभ्यः ।

सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररुपेभ्यः ॥ (मध्यमाभ्यां नमः) ॥

तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥ (अनामिकाभ्यां नमः)॥

ईशानः सर्वविद्यानां ईश्वरः सर्वभूतानां ब्रह्माधिपतिर्-ब्रह्मणोधिपतिर्-ब्रह्मा

शिवो मे अस्तु सदाशिवोम् ॥ (कनिष्ठिकाभ्यां नमः) ॥

नमो वः किरिकेभ्यो देवानाग्ं हृदयेभ्यः ।(हृदयाय नमः)॥

नमो गणेभ्यो गणपतिभ्यश्च वो नमः ।(पृष्ठाय नमः)॥

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमः । (पार्श्वाभ्यां नमः) ॥

विज्यं धनुः कपर्दिनो विशल्यो बाणवाग्ं उत ।

अनेशन्नस्येषव आभुरस्य निषङ्गथिः । (जटराय नमः) ॥

हिरण्यगर्भस्-समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।

सदाधार पृथिवीं-द्यामुतेमां कस्मै देवाय हविषा विधेम ॥(नाभ्यै नमः)॥

मीढुष्टम शिवतम शिवो नः सुमना भव ।

परमे वृक्ष आयुधन्-निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि ॥(कठ्यै नमः)॥

ये भूतानां-अधिपतयो विशिखासः कपर्दिनः ।

तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि ॥ (गुह्याय नमः)॥

ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ।

तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि ॥ (अण्डाभ्यां नमः) ॥

स शिरा जातवेदा अक्षरं परमं पदम् ।

वेदानाग्ं-शिरसि माता आयुष्मन्तं करोतु माम् ॥ (अपानाय नमः) ॥

मा नो महान्त मुत मा नो अर्भकं मा न उक्षन्त-मुत मा न उक्षितम् ।

मा नोऽवधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः ॥ (ऊरूभ्यां नमः) ॥

एष ते रुद्र-भागस्तञ्जुषस्व तेनावसेन परो

मूजवतोऽतीह्यवतत धन्वा पिनाकहस्तः कृत्तिवासाः ॥(जानुभ्यां नमः)॥

सग्ंसृष्ट-जित्सोमपा बाहु-शर्ध्यूर्ध्व धन्वा प्रतिहिताभिरस्ता ।

बृहस्पते परिदीया रथेन रक्षोहाऽमित्राग्ं अपबाधमानः ॥(जंघाभ्यां नमः)॥

विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् ।

सर्वो ह्येष रुद्र-स्तस्मै रुद्राय नमो अस्तु ॥ (गुल्फाभ्यां नमः) ॥

ये पथां पथिरक्षय ऐलबृदा यव्युधः ॥

तेषाग्ं सहस्रयोजने-ऽवधन्वानि तन्मसि ॥ (पादाभ्यां नमः) ॥

अध्यवोच-दधिवक्ता प्रथमो दैव्यो भिषक् ।

अहीग्श्च सर्वांजम्भयन् सर्वाश्च यातुधान्यः ॥ (कवचाय हुम्) ॥

नमो बिल्मिने च कवचिने च नमः श्रुताय च  श्रुतसेनाय च ॥ (उपकवचाय हुम्) ॥

नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।

अथो ये अस्य सत्वानोऽहं तेभ्यो करन्नमः ॥ (नेत्रत्रयाय वौषट्) ॥

प्रमुंच धन्वनस्त्व-मुभयो-रार्त्नियोर्ज्याम् ।

याश्च ते  हस्त इषवः परा ता भगवो वप ॥ (अस्त्राय फट्) ॥

य एतावन्तश्च भूयाग्ंसश्च दिशो रुद्रा वितस्थिरे

तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि ॥ (इति दिग्बन्धः) ॥

ॐ नमो भगवते रुद्राय ॥

॥ दशाङ्गन्यासः ॥२॥

ॐ नमः । नं नमः । मों नमः । भं नमः । गं नमः ।

वं नमः । तें नमः । रुं नमः । द्रां नमः । यं नमः ॥

॥  पञ्चाङ्गन्यासः ॥३॥(पादादिमूर्धान्त पंचाङ्गन्यासः)

सद्योजातं प्रपद्यामि सद्यो जाताय वै नमो नमः ।

भवे भवे नातिभवे भवस्व माम् । भवोद्भवाय नमः ॥ (पादाभ्यां नमः)

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय  नमः

कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो

बलप्रमथनाय नम-स्सर्वभुतदमनाय नमो मनोन्मनाय नमः ॥(ऊरूभ्यां नमः)॥

अघोरेभ्योऽथ घोरेभ्यो घोरघोर-तरेभ्यः ।

सर्वेभ्य-स्सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररुपेभ्यः ॥  (हृदयाय नमः) ॥

तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥(मुखाय नमः)॥

ईशानस्-सर्वविद्याना-मीश्वर-स्सर्व भूतानां

ब्रह्माधिपति-र्ब्रह्मणोधिपति-र्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥ (मूर्ध्ने नमः) ॥

॥ हंसगायत्री ॥४॥

अस्य श्री हंसगायत्री महामन्त्रस्य, अव्यक्त परब्रह्म ऋषिः, अनुष्टुप् छन्दः, परमहंसो देवता ॥ हंसां बीजम्, हंसीं शक्तिः, हंसूं कीलकम् ॥ परमहंस प्रसाद सिद्ध्यर्थे जपे विनियोगः ॥

हंसां अङ्गुष्ठभ्यां नमः ॥ हंसीं तर्जनीभ्यां नमः ॥ हंसूं मध्यमाभ्यां नमः ॥

हंसैं अनामिकाभ्यां नमः ॥ हंसौं कनिष्ठिकाभ्यां नमः ॥ हंसः करतलकरपृष्ठाभ्यां नमः ॥

हंसां हृदयाय नमः ॥ हंसीं शिरसे स्वाहा ॥ हंसूं शिखायै वषट् ॥ हंसैं कवचाय हुम् ॥

हंसौं नेत्रत्रयाय वौषट् । हंसः अस्त्राय फट् ॥ भूर्भुवस्-सुवरोमिति दिग्बन्धः ॥ ध्यानम् ॥

गमागमस्थं गमनादिशून्यं चिद्रूपदीपं तिमिरापहारम् ।

पश्यामि ते सर्वजनान्तरस्थं नमामि हंसं परमात्मरूपम् ॥

हंस हंसाय विद्महे परमहंसाय धीमहि । तन्नो हंसः प्रचोदयात् ॥(3 times)

हंस हंसेति यो ब्रूयाद्धंसो नाम सदाशिवः ।

एवं न्यासविधिं कृत्वा ततः संपुटमारभेत् ॥

॥ दिक् संपुटन्यासः ॥ ५ ॥

ॐ भूर्भुवस्सुवरों

लम् । त्रातारमिन्द्र मवितारमिन्द्रगं हवे हवे सुहवगं शूरमिन्द्रम् ।

हुवे नु शक्रं पुरुहूतमिन्द्रगग् स्वस्ति नो मघवा धात्विन्द्रः ।

लं इन्द्राय वज्रहस्ताय सुराधिपतये ऐरावत-वाहनाय सांगाय

सायुधाय सशक्ति परिवाराय उमामहेश्वर पार्षदाय नमः । लं इन्द्राय नमः ।

पूर्व-दिग्भागे इन्द्रः सुप्रीतो वरदो भवतु ॥५-१॥

ॐ भूर्भुवस्सुवरों

रम् । त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽव यासिसीष्ठाः ।

यजिष्ठो वह्नितमश्-शोशुचानो विश्वा द्वेषागं्सि प्रमुमुग्ध्यस्मत् ॥

रं अग्नये शक्ति–हस्ताय तेजोऽधिपतये अज–वाहनाय साङ्गाय

सायुधाय सशक्ति परिवाराय उमामहेश्वर पार्षदाय नमः । रं अग्नये नमः ।

आग्नेय–दिग्भागे अग्निः सुप्रीतो वरदो भवतु ॥५–२॥

ॐ भूर्भुवस्सुवरों

हम् । सुगन्नः पन्थामभयं कृणोतु । यस्मिन्नक्षत्रे यम एति राजा ।

यस्मिन्नेन मभ्यषिञ्चन्त देवाः । तदस्य चित्रग्ं हविषा यजाम ॥

हं यमाय दण्डहस्ताय धर्माधिपतये महिष–वाहनाय सांगाय

सायुधाय सशक्ति परिवाराय उमामहेश्वर पार्षदाय नमः । हं यमाय नमः ।

दक्षिण–दिग्भागे यमः सुप्रीतो वरदो भवतु ॥५–३॥

ॐ भूर्भुवस्सुवरों

षम् । असुन्वन्त–मयजमान–मिच्छस्तेनस्येत्यान्तस्करस्यान्वेषि ।

अन्यमस्मदिच्छ सा त इत्या नमो देवि निरृते तुभ्यमस्तु ॥

षं निरृतये खड्ग–हस्ताय रक्षोधिपतये नर–वाहनाय सांगाय

सायुधाय सशक्ति परिवाराय उमामहेश्वर पार्षदाय नमः । षं निरृतये नमः ।

नैरृत–दिग्भागे निरृति–स्सुप्रीतो वरदो भवतु ॥५–४॥

ॐ भूर्भुवस्सुवरों

वम् । तत्वा यामि ब्रह्मणा वन्दमान–स्तदा शास्ते यजमानो हविर्भिः ।

अहेडमानो वरुणेह–बोध्युरुशग्ं स मा न आयुः प्रमोषीः ॥

वं वरुणाय पाश–हस्ताय जलाधिपतये मकर–वाहनाय सांगाय

सायुधाय सशक्ति परिवाराय उमामहेश्वर पार्षदाय नमः । वं वरुणाय नमः ।

पश्चिम–दिग्भागे वरुणः सुप्रीतो वरदो भवतु ॥५–५॥

ॐ भूर्भुवस्सुवरों

यम् । आ नो नियुद्भिश्–शतिनीभिरध्वरम् । सहस्रिणीभि–रुपयाहि यज्ञम् ।

वायो अस्मिन् हविषि मादयस्व । यूयं पात स्वस्तिभिस्-सदा नः ॥

यं वायवे साङ्कुशध्वज-हस्ताय प्राणाधिपतये मृग-वाहनाय सांगाय

सायुधाय सशक्ति परिवाराय उमामहेश्वर पार्षदाय नमः । यं वायवे नमः ।

वायव्य-दिग्भागे वायुः सुप्रीतो वरदो भवतु ॥५-६॥

ॐ भूर्भुवस्सुवरों

सम् । वयग्ं सोम व्रते तव । मनस्तनूषु बिभ्रतः । प्रजावन्तो अशीमहि ॥

सं सोमाय अमृत कलश-हस्ताय नक्षत्राधिपतये अश्व-वाहनाय सांगाय

सायुधाय सशक्ति परिवाराय उमामहेश्वर पार्षदाय नमः । सं सोमाय नमः ।

उत्तर-दिग्भागे सोमः सुप्रीतो वरदो भवतु ॥५-७॥

ॐ भूर्भुवस्सुवरों

शम् । तमीशानं जगत स्तस्थु-षस्पतिम् । धियं जिन्वमवसे हूमहे वयम् ।

पूषा नो यथा वेदसामसद्-वृधे । रक्षिता पायुरदब्धस्-स्वस्तये ॥

शं ईशानाय शूल-हस्ताय विद्याधिपतये वृषभ-वाहनाय सांगाय

सायुधाय सशक्ति परिवाराय उमामहेश्वर पार्षदाय नमः । शं ईशानाय नमः ।

ईशान-दिग्भागे ईशानः सुप्रीतो वरदो भवतु ॥५-८॥

ॐ भूर्भुवस्सुवरों

अम् । अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भर हूतौ सजोषाः ।

यश्-शंसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्मां अवन्तु देवाः ॥

अं ब्रह्मणे पद्म-हस्ताय लोकाधिपतये हंस-वाहनाय सांगाय

सायुधाय सशक्ति परिवाराय उमामहेश्वर पार्षदाय नमः । अं ब्रह्मणे नमः ।

ऊर्ध्व-दिग्भागे ब्रह्म सुप्रीतो वरदो भवतु ॥५-९॥

ॐ भूर्भुवस्सुवरों

ह्रीम् । स्योना पृथिवि भवानृक्षरा निवेशनी । यच्छानश्-शर्म सप्रथाः ॥

ह्रीं विष्णवे चक्र-हस्ताय नागाधिपतये गरुड-वाहनाय सांगाय

सायुधाय सशक्ति परिवाराय उमामहेश्वर पार्षदाय नमः । ह्रिं विष्णवे नमः ।

अधो-दिग्भागे विष्णुस्सुप्रीतो वरदो भवतु ॥५-१०॥

॥ षोडशाङ्ग रौद्रीकरणम् ॥ ६ ॥

विभूरसि प्रवाहणो रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः ॥

वह्निरसि हव्यवाहनो रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः ॥

श्वात्रोसि प्रचेताः रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः ॥

तुथोसि विश्ववेदा रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः ॥

उशिगसिकवी रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः ॥

अंघारिरसि बंभारी रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः ॥

अवस्युरसि दुवस्वान् रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः ॥

शुन्ध्युरसि मार्जालीयो रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः ॥

सम्राडसि कृशानू रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः ॥

परिषद्योसि पवमानो रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः ॥

प्रतक्वासि नभस्वान् रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः ॥

असंमृष्टोसि हव्यसूदो रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः ॥

ऋतधामासि सुव ज्योंति रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः ॥

ब्रह्मज्योतिरसि सुवर्धामा रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः॥

अजोस्येकपात् रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः ॥

अहिरसि बुध्नियो रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः ॥

त्वगस्थिगतैः सर्वपापैः प्रमुच्यते । सर्वभूतेष्-वपराजितो भवति ।

ततो भूतप्रेत पिशाच ब्रह्मराक्षस यक्ष यमदूत शाकिनी डाकिनि

सर्प श्वापद वृश्चिक तस्कराद्-उपद्रवाद्-उपघाताः ।

सर्वे ज्वलन्तं पश्यन्तु । मां रक्षन्तु । सर्वे महा जनान् रक्षन्तु । येतान् ग्रामस्थान् रक्षन्तु ॥

॥ गुह्यादि-मस्तकान्तं षडङ्गन्यासः ॥ ७ ॥

मनो ज्योतिर्-जुषता-माज्यं विच्छिन्नं यज्ञग्ं समिमं दधातु ।
या इष्टा उषसो निमृचश्च तास्सन्दधामि हविषा घृतेन ॥

अबोद्-ध्यग्निस् समिधा जनानां प्रति धेनुमिवायती-मुषासम् ।
यह्वा इव प्रवया मुज्जिहानाः प्रभानवः सिस्रते नाकमच्छ ॥

अग्निर्-मूर्धा दिवः ककुत् पतिः पृथिव्या अयम् । अपाग्ं -रेताग्ंसि जिन्वति ॥

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानर-मृताय जातमग्निम् ।
कविग्ं सम्राज-मतिथिं जनानां आसन्ना पात्रं जनयन्त देवाः ॥

मर्माणि ते वर्मभिश्छादयामि सोमस्त्वा राजाऽमृतेनाभिवस्ताम् ।
उरोर्वरीयो वरिवस्ते अस्तु जयन्तं त्वा मनुमदन्तु देवाः ॥

जातवेदा यदि वा पावकोऽसि । वैश्वानरो यदि वा वैध्युतोऽसि ।
शं प्रजाभ्यो यजमानाय लोकम् ॥ ऊर्जं पुष्टिं दद-दभ्याव-वृत्स्व ॥ (शिरसे नमः)

॥ आत्मरक्षा कर्त्तव्या ॥

॥ आत्मरक्षा ॥ ८ ॥

ब्रह्मात्मन्वद सृजत । तदकामयत । समात्मना पद्येयेति ।
आत्मन्नात्मन् नित्यामन्त्रयत । तस्मै दशमग्ं हूतः प्रत्यशृणोत् ।
स दशहूतोऽभवत् । दशहूतो हवै नामैषः । तं वा एतं दशहूतग्ं सन्तम् ।
दशहोतेत्या-चक्षते परोक्षेण । परोक्षप्रिया इव हि देवाः ॥

आत्मन्नात्मन् नित्यामन्त्रयत । तस्मै सप्तमग्ं हूतः प्रत्यशृणोत् ।
स सप्तहूतोऽभवत् । सप्तहूतो हवै नामैषः । तं वा एतग्ं सप्तहूतग्ं सन्तम् ।
सप्तहोतेत्या-चक्षते परोक्षेण । परोक्षप्रिया इव हि देवाः ॥

आत्मन्नात्मन् नित्यामन्त्रयत । तस्मै षष्ठग्ं हूतः प्रत्यशृणोत् ।
स षड्ढूतोऽभवत् । षड्ढूतो हवै नामैषः । तं वा एतग्ं षड्ढूतग्ं सन्तम् ।
षड्ढोतेत्या-चक्षते परोक्षेण । परोक्षप्रिया इव हि देवाः ॥

आत्मन्नात्मन् नित्यामन्त्रयत । तस्मै पञ्चमगं हूतः प्रत्यशृणोत् ।
स पञ्चहूतोऽभवत् । पञ्चहूतो हवै नामैषः । तं वा एतं पञ्चहूतगं सन्तम् ।
पञ्चहोतेत्या–चक्षते परोक्षेण । परोक्षप्रिया इव हि देवाः ॥

आत्मन्नात्मन् नित्यामन्त्रयत । तस्मै चतुर्थगं हूतः प्रत्यशृणोत् ।
स चतुर्हूतोऽभवत् । चतुर्हूतो हवै नामैषः । तं वा एतं चतुर्–हूतगं सन्तम् ।
चतुर्होतेत्या–चक्षते परोक्षेण । परोक्षप्रिया इव हि देवाः ॥

तमब्रवीत् । त्वं वै मे नेदिष्ठगं हूतः प्रत्यश्रौषीः । त्वयै नानाख्यातार इति ।
तस्मान्नु–हैनागं श्चतुर् होतार इत्या चक्षते । तस्माच्छुश्रूषुः पुत्राणागं हृद्यतमः ।
नेदिष्ठो हृद्य तमः । नेदिष्ठो ब्रह्मणो भवति । य एवं वेद ॥ (आत्मने नमः)

॥ शिवसङ्कलपः ॥ ९ ॥

येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेन सर्वम् ।
येन यज्ञस्त्रायते सप्तहोता तन्मे मनः शिवसंकल्पमस्तु ॥ १॥

येन कर्माणि प्रचरन्ति धीरा यतो वाचा मनसा चारुयन्ति ।
यत्सम्मित मनुसम्यन्ति प्राणिनस्तन्मे मनः शिवसंकल्पमस्तु ॥२॥

येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः ।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसंकल्पमस्तु ॥ ३॥

यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ।
यस्मान् न ऋते किञ्चन कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु ॥४॥

सुषारथिरश्वानिव यन्मनुष्यान्–नेनीयते ऽभीशुभिर्वाजिन इव ।
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसंकल्पमस्तु ॥ ५॥

यस्मिन् ऋचः साम यजूगंषि यस्मिन् प्रतिष्ठिता रथनाभा विवाराः ।
यस्मिग्–श्चितगं सर्वमोतं प्रजानां तन्मे मनः शिवसंकल्पमस्तु ॥ ६॥

यदत्र षष्टं त्रिशतगं सुवीरं यज्ञस्य गुह्यं नव नावमाय्यम् ।
दश पंच त्रिगं शतं यत्परं च तन्मे मनः शिवसंकल्पमस्तु ॥७॥

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति ।

दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु ॥ ८॥

येनेदं विश्वं जगतो बभूव ये देवापि महतो जातवेदाः ।

तदेवाग्निस्तमसो ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु ॥ ९॥

येन द्यौः पृथिवी चान्तरिक्षं च ये पर्वताः प्रदिशो दिशश्च ।

येनेदं जगद्-व्याप्तं प्रजानां तन्मे मनः शिवसंकल्पमस्तु ॥१०॥

ये मनो हृदयं ये च देवा ये दिव्या आपो ये सूर्यरश्मिः ।

ते श्रोत्रे चक्षुषी सञ्चरन्तं तन्मे मनः शिवसंकल्पमस्तु ॥११॥

अचिन्त्यं चा प्रमेयं च व्यक्ता-व्यक्त परं चयत् ।

सूक्ष्मात् सूक्ष्मतरं ज्ञेयं तन्मे मनः शिवसंकल्पमस्तु ॥१२॥

एका च दश शतं च सहस्रं चायुतं च नियुतं च प्रयुतं चार्बुदं  च न्यर्बुदं च

समुद्रश्च मध्यं चान्तश्च परार्धश्च तन्मे मनः शिवसंकल्पमस्तु ॥१३॥

ये पञ्च पञ्चदश शतग्ं सहस्र-मयुतन्-न्यर्बुदं च ।

ते अग्नि-चित्येष्टकास्तग्ं शरीरं तन्मे मनः शिवसंकल्पमस्तु ॥१४॥

वेदाहमेतं पुरुषं महान्त-मादित्य-वर्णं तमसः परस्तात् ।

यस्य योनिं परिपश्यन्ति धीरास्-तन्मे मनः शिवसंकल्पमस्तु ॥१५॥

यस्येदं धीराः पुनन्ति कवयो ब्रह्माणमेतं त्वा वृणत इन्दुम् ।

स्थावरं जङ्गमं द्यौराकाशं तन्मे मनः शिवसंकल्पमस्तु ॥१६॥

परात्-परतरं चैव यत्पराच्चैव यत्परम् ।

यत्परात्-परतो ज्ञेयं तन्मे मनः शिवसंकल्पमस्तु ॥१७॥

परात्-परतरो ब्रह्मा तत्परात्-परतो हरिः ।

तत्परात्-परतोऽधीशस्-तन्मे मनः शिवसंकल्पमस्तु ॥१८॥

या वेदादिषु गायत्री सर्व-व्यापि महेश्वरी ।

ऋग्यजुस्-सामाथर्वैश्च तन्मे मनः शिवसंकल्पमस्तु ॥१९॥

यो वै देवं महादेवं प्रणवं परमेश्वरम् ।

यस्सर्वे सर्व वेदैश्च तन्मे मनः शिवसंकल्पमस्तु ॥२०॥

प्रयतः प्रणवोङ्कारं प्रणवं पुरुषोत्तमम् ।
ओंकारं प्रणवात्मानं तन्मे मनः शिवसंकल्पमस्तु ॥२१॥

योऽसौ सर्वेषु वेदेषु पठ्यते ह्यज ईश्वरः ।
अकायो निर्गुणो–ह्यात्मा तन्मे मनः शिवसंकल्पमस्तु ॥२२॥

गोभिर्जुष्टं धनेन ह्यायुषा च बलेन च ।
प्रजया पशुभिः पुष्कराक्षं तन्मे मनः शिवसंकल्पमस्तु ॥२३॥

कैलास शिखरे रम्ये शंकरस्य शिवालये ।
देवतास्तत्र मोदन्ते तन्मे मनः शिवसंकल्पमस्तु ॥२४॥

त्र्यंबकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्–मृत्योर्मुक्षीय माऽमृतात् तन्मे मनः शिवसंकल्पमस्तु ॥२५॥

विश्वत–श्चक्षुरुत विश्वतो मुखो विश्वतो हस्त उत विश्वतस्पात् ।
संबाहुभ्यान्–नमति संपतत्रैर्–द्यावा पृथिवी जनयन्
देव एकस्–तन्मे मनः शिवसंकल्पमस्तु ॥२६॥

चतुरो वेदानधीयीत सर्व शास्त्रमयं विदुः ।
इतिहास पुराणानां तन्मे मनः शिवसंकल्पमस्तु ॥२७॥

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्त–मुत मा न उक्षितम् ।
मा नोऽवधीः पितरं मोत मातरं प्रिया मा नस्तनुवो
रुद्र रीरिषस्तन्मे मनः शिवसंकल्पमस्तु ॥२८॥

मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान्मा नो रुद्र भामितोऽवधी–र्हविष्मन्तो नमसा
विधेम ते तन्मे मनः शिवसंकल्पमस्तु ॥२९॥

ऋतगं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमस्तन्मे मनः शिवसंकल्पमस्तु ॥३०॥

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे । वोचेम शन्तमगं हृदे ।

सर्वो ह्येष रुद्र तस्मै रुद्राय नमो अस्तु तन्मे मनः शिवसंकल्पमस्तु ॥३१॥

ब्रह्मजज्ञानं प्रथमं पुरस्ता–द्विसीमत–स्सुरुचो वेन आवः ।
स बुध्निया उपमा अस्य विष्ठास्–सतश्च योनि मसतश्च
विवस्तन्मे मनः शिवसंकल्पमस्तु ॥३२॥

यः प्राणतो निमिषतो महित् एक इद्राजा जगतो बभूव ।
य ईशे अस्य द्विपद–श्चतुष्पदः कस्मै देवाय हविषा विधेम
तन्मे मनः शिवसंकल्पमस्तु ॥३३॥

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यस्य छायाऽमृतं यस्यऽमृत्युः कस्मै देवाय हविषा विधेम तन्मे मनः शिवसंकल्पमस्तु ॥

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाऽऽविवेश
तस्मै रुद्राय नमो अस्तु तन्मे मनः शिवसंकल्पमस्तु ॥३५॥

गन्ध–द्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीग्ं सर्व भूतानां तामिहोपह्वये श्रियं तन्मे मनः शिवसंकल्पमस्तु ॥३६॥

य इदग्ं शिव संकल्पग्ं सदा ध्यायन्ति ब्राह्मणाः ।
ते परं मोक्षं गमिष्यन्ति तन्मे मनः शिवसंकल्पमस्तु ॥३७॥(हृदयाय नमः)

## ॥ पुरुषसूक्तम् ॥ १० ॥

ॐ सहस्रशीर्षा पुरुषः । सहस्राक्षः सहस्रपात् । स भूमिं विश्वतो वृत्वा ।
अत्यतिष्टद्दशांगुलम् । पुरुष एवेदग्ं सर्वम् । यद्भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानः । यदन्नेनातिरोहति । एतावानस्य महिमा ।
अतो ज्यायाग्श्च पूरुषः। पादोऽस्य विश्वा भूतानि । त्रिपाद–स्यामृतं दिवि ।
त्रिपादूर्ध्व उदैत्पुरुषः । पादोस्येहाऽऽभवात्पुनः । ततो विष्वं व्यक्रामत् ।
साशनानशने अभि । तस्माद्–विराडजायत । विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत । पश्चाद्–भूमिमथो पुरः । यत्पुरुषेण हविषा ।
देवा यज्ञमतन्वत । वसन्तो अस्या–सीदाज्यम् । ग्रीष्म इध्मश्शरद्धविः ।
सप्तास्यासन् परिधयः । त्रिस्सप्त समिधः कृताः । देवा यद्यज्ञं तन्वानाः ।

अबध्नन् पुरुषं पशुम् । तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः ।

तेन देवा अयजन्त । साध्या ऋषयश्च ये । तस्माद् यज्ञात्-सर्वहुतः ।

संभृतं पृषदाज्यम् । पशूग्स्ताग्श्चक्रे वायव्यान् । आरण्यान् ग्राम्याश्च ये ।

तस्माद्-यज्ञात्-सर्वहुतः । ऋचस्सामानि जज्ञिरे । छन्दाग्ंसि जज्ञिरे तस्मात् ।

यजुस्तस्मादजायत । तस्मादश्वा अजायन्त । ये के चोभयादतः ।

गावो ह जज्ञिरे तस्मात् । तस्मात्-जाता अजावयः । यत्पुरुषं व्यदधुः ।

कतिधा व्यकल्पयन् । मुखं किमस्य कौ बाहू । कावूरू पादावुच्येते ।

ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः ।

पद्भ्याग्ं शूद्रो अजायत । चन्द्रमा मनसो जातः । चक्षोः सूर्यो अजायत ।

मुखा-दिन्द्र-श्चाग्निश्च । प्राणाद्-वायुरजायत । नाभ्या आसीद्-अन्तरिक्षम् ।

शीर्ष्णो द्यौः समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात् । तथा लोकाग्ं अकल्पयन् ।

वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसस्तु पारे ।

सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वा-ऽभिवदन्-यदास्ते ।

धाता पुरस्ताद्-यमुदा-जहार । शक्रः प्रविद्वान् प्रदिश श्चतस्रः ।

तमेवं विद्वान्-अमृत इह भवति । नान्यः पन्था अयनाय विद्यते ।

यज्ञेन यज्ञम्-अयजन्त देवाः । तानि धर्माणि प्रथमान्यासन् ।

तेह नाकं महिमानस्सचन्ते । यत्र पूर्वे साध्याः सन्ति देवाः ॥(शिरसे स्वाहा)

। उत्तरनारायणम् । ११ ॥

ॐ नमो नारायणाय ।

अद्भ्यः संभूतः पृथिव्यै रसाच्च । विश्वकर्मणस्समवर्तताधि । तस्य त्वष्टा विदधद्-रूपमेति । तत्पुरुषस्य विश्व-माजानमग्रे । वेदाहमेतं पुरुषं महान्तम् । आदित्य-वर्णं तमसः परस्तात् । तमेवं विद्वानमृत इह भवति । नान्यः पन्था विद्यतेऽयनाय । प्रजापतिश्चरति गर्भे अन्तः । अजायमनो बहुधा विजायते । तस्य धीराः परिजानन्ति योनिम् । मरीचीनां पदमिच्छन्ति वेधसः ॥ यो देवेभ्य आतपति । यो देवानां पुरोहितः। पूर्वो यो देवेभ्यो जातः । नमो रुचाय ब्राह्मये । रुचं ब्राह्मं जनयन्तः । देवा अग्रे तदब्रुवन् । यस्त्वैवं ब्राह्मणो विद्यात् । तस्य देवा असन्वशे । ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे । नक्षत्राणि रूपम् । अश्विनौ व्यात्तम् ।

इष्टं मनिषाण । अमुं मनिषाण । सर्वं मनिषाण ।(शिखायै वषट्)

॥ अप्रतिरथम् ॥ १२ ॥

आशुः शिशानो वृषभो न युध्मो घनाघनः क्षोभण-श्चर्षणीनाम्

सन्क्रन्दनो ऽनिमिष एक वीरश्शतग्ं सेना अजयत्साकमिन्द्रः ॥

सन्क्रन्दनेना निमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।

तदिन्द्रेण जयत तत् सहध्वं युधो नर इषुहस्तेन वृष्णा ॥

स इषुहस्तैः स निषङ्गिभिर्वशी सग्ग्स्रष्टा सयुध इन्द्रो गणेन ।

सग्ंसृष्टजित् सोमपा बाहुशर्ध्यूर्ध्व धन्वा प्रतिहिताभिरस्ता ॥

बृहस्पते परिदीया रथेन रक्षोहाऽमित्राग्ं अपबाधमानः ।

प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माक-मेद्ध्यविता रथानाम् ॥

गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्त-मोजसा ।

इमग्ं सजाता अनुवीरयध्वमिन्द्रग्ं सखायोऽनु सग्ंरभध्वम् ॥

बलविज्ञायः स्थविरः प्रवीरस्सहस्वान् वाजी सहमान उग्रः ।

अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ गोवित् ॥

अभिगोत्राणि सहसा गाहमानोऽदायो वीरश्शतमन्यु-रिन्द्रः ।

दुश्च्यवनः पृतनाषाडयुद्ध्योऽस्माकग्ं सेना अवतु प्रयुत्सु ॥

इन्द्र आसां नेता बृहस्पतिर्-दक्षिणा यज्ञः पुर एतु सोमः ।

देवसेनाना-मभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रे ॥

इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुताग्ं शर्द्ध उग्रम् ।

महामनसां भुवनच्यवानां घोषो देवानां जयता मुदस्थात् ॥

अस्माक-मिन्द्रस्समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु ।

अस्माकं वीरा उत्तरे भवन्त्वस्मानु देवा अवता हवेषु ॥

उद्धर्षय मघवन्नायुधान्-युत् सत्वनां मामकानां महाग्ंसि ।

उद् वृत्रहन् वाजिनान् वाजिनान्युद्रथानान् जयतामेतु घोषः ॥

उपप्रेत जयता नरस्स्थिरावस्सन्तु बाहवः । इन्द्रो वः शर्म यच्छत्वनाधृष्या यथाऽसथ ॥

अवसृष्टा परापत शरव्ये ब्रह्म सग्ंशिता । गच्छामित्रान् प्रविश मैषां कञ्चनोच्छिषः ॥

मर्माणि ते वर्मभिश्छादयामि सोमस्त्वा राजाऽमृतेनाभिवस्ताम् ।

उरोर्वरीयो वरिवस्ते अस्तु जयन्तं त्वामनु मदन्तु देवाः ॥

यत्र बाणाः सम्पतन्ति कुमारा विशिखा इव । इन्द्रो नस्तत्र वृत्रहा विश्वाहा शर्म यच्छतु ॥

(कवचाय हुं)

॥ प्रतिपूरुषमित्यनुवाकः ॥ १३ ॥

प्रतिपूरुष-मेककपालान् निर्वपत्-येकमतिरिक्तं यावन्तो गृह्यास्-

स्मस्तेभ्यः कमकरं पशूनाग्ं शर्मासि शर्म यजमानस्य शार्म मे

यच्छैक एव रुद्रो न द्वितीयाय तस्थ आखुस्ते रुद्र पशुस्तंजुषस्व

एष ते रुद्र भाग सह स्वस्राम्बिकया तं जुषस्व भेषजं गवेऽश्वाय

पुरुषाय भेषज-मथो अस्मभ्यं भेषजग्ं सुभेषजं यथाऽसति ।

सुगं मेषाय मेष्या अवाम्ब रुद्रमदिमह्यव देवं त्र्यम्बकम् ।

यथा नः श्रेयसः करद्यथा नो वश्य सः करद्-यथा नः पशुमतः करद् यथा नो व्यवसाययात् । त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।

उर्वारुकमिव बन्धनान्-मृत्योर्मुक्षीय माऽमृतात् । एषते रुद्र-भागस्तं जुषस्व तेनावसेन परो मुजवतोऽतीह्यवतत धन्वा पिनाकहस्तः कृत्तिवासाः ॥

प्रति पूरुषमेककपालान् निर्वपति । जाता एव प्रजा रुद्रान्निरवदयते । एकमतिरिक्तम् । जनिष्यमाणा एव प्रजा रुद्रान्निरवदयते । एककपाला भवन्ति । एकधैव रुद्रन्निरवदयते । नाभिघारयति । यदभिघारयेत् । अन्तरवचारिणग्ं रुद्रं कुर्यात् । एकोल्मुकेन यन्ति । (१)

तद्धि रुद्रस्य भागधेयम् । इमां दिशंयन्ति । एषा वै रुद्रस्य दिक् ।

स्वायामेव दिशि रुद्रं निरवदयते । रुद्रो वा अपशुकाया आहुत्यै नातिष्ठत ।

असौ ते पशुरिति निर्द्दिशेद्यं द्विष्यात् । यमेवद्वेष्टि ।

तमस्मै पशुं निर्द्दिशति । यदि न द्विष्यात् । आखुस्ते पशुरिति ब्रूयात् ।(२)

न ग्राम्यान् पशून् हिनस्ति । नारण्यान् । चतुष्पते जुहोति ।

एष वा अग्नीनां पड्बीशो नाम । अग्निवत्-येव जुहोति ।

मध्यमेन पर्णेन जुहोति । स्रुग्घ्येषा । अथो खलु ।

अन्तमेनैव होतव्यम् । अन्तत एव रुद्रं-निरवदयते ।(३)

एष ते रुद्र भागः सहस्वस्रा-ऽम्बिकयेत्याह । शरद्वा अस्याम्बिका स्वसा ।

तया वा एष हिनस्ति । यगं हिनस्ति । तयैवैनगं सह शमयति ।

भेषजंगव इत्याह । यावन्त एव ग्राम्याः पशवः । तेभ्यो भेषजं करोति ।

अवाम्ब रुद्रमदि महीत्याह । आशिषमेवैतामाशास्ते ।(४)

त्र्यंबकं यजामह इत्याह । मृत्योर्मुक्षीय माऽमृतादिति वा वै तदाह ।

उत्किरन्ति । भगस्य लीप्सन्ते । मूते कृत्वा सजन्ति । यथा जनं यतेऽवसंकरोति । तादृगेव तत् । एष ते रुद्र भाग इत्याह निरवत्यै । अप्रतीक्षमायन्ति । अपः परिषिञ्चति । रुद्रस्यान्तर्हित्यै । प्रवा एतेऽस्माल्लोकाच्च्यवन्ते । ये त्रियंबकैश्चरन्ति । आदित्यं चरुं पुनरेत्य निर्वपति । इयं वा अदितिः । अस्यामेव प्रतितिष्ठन्ति ॥ (नेत्रत्रयाय वौषट्)

॥ त्वमग्ने रुद्रोऽनुवाकः ॥ १४ ॥

त्वमग्ने रुद्रो असुरो महो दिवः । त्वगं शर्द्धो मारुतं पृक्ष ईशिषे ।

त्वं वातैररुणैर्-यासि शङ्गयः । त्वं पूषा विधतः पासि नुत्मना ।

देवा देवेषु श्रयद्ध्वम् । प्रथमा द्वितीयेषु श्रयद्ध्वम् ।

द्वितीयास् तृतीयेषु श्रयद्ध्वम् । तृतीयाश्चतुर्थेषु श्रयद्ध्वम् ।

चतुर्थाः पञ्चमेषु श्रयद्ध्वम् । पञ्चमाः षष्ठेषु श्रयद्ध्वम् ।

षष्ठाः सप्तमेषु श्रयद्ध्वम् । सप्तमाः अष्टमेषु श्रयद्ध्वम् ।

अष्टमा नवमेषु श्रयद्ध्वम् । नवमा दशमेषु श्रयद्ध्वम् ।

दशमा एकादशेषु श्रयद्ध्वम् । एकादशा द्वादशेषु श्रयद्ध्वम् ।

द्वादशास् त्रयोदशेषु श्रयद्ध्वम् । त्रयोदशास् चतुर्दशेषु श्रयद्ध्वम् ।

चतुर्दशाः पञ्चदशेषु श्रयद्ध्वम् । पञ्चदशाः षोडशेषु श्रयद्ध्वम् ।

षोडशाः सप्तदशेषु श्रयद्ध्वम् । सप्तदशाः अष्टादशेषु श्रयद्ध्वम् ।

अष्टादशाः एकान्न-विगंशेषु श्रयद्ध्वम् । एकान्न-विगंशाः विगंशेषु श्रयद्ध्वम् ।

विगंशा एकविगंशेषु श्रयद्ध्वम् । एकविगंशा द्वाविगंशेषु श्रयद्ध्वम् ।

द्वाविगंशास्त्रयो-विगंशेषु श्रयद्ध्वम् । त्रयोविगंशाश्चतुर्विगंशेषु श्रयद्ध्वम् ।

चतुर्विग्ंशा पञ्चविग्ंशेषु श्रयद्ध्वम् । पञ्चविग्ंशाष्-षड्विग्ंशेषु श्रयद्ध्वं

षड्विग्ंशा-सप्त विग्ंशेषु श्रयद्ध्वम् । सप्तविग्ंशा अष्टाविग्ंशेषु श्रयद्ध्वम् ।

अष्टाविग्ंशा एकान्नत्रिग्ंशेषु श्रयद्ध्वम् । एकान्नत्रिग्ंशा-स्त्रिग्ंशेषु श्रयद्ध्वम् ।

त्रिग्ंशा एकत्रिग्ंशेषु श्रयद्ध्वम् । एकत्रिग्ंशा द्वात्रिग्ंशेषु श्रयद्ध्वम् ।

द्वात्रिग्ंशा-स्त्रय-स्त्रिग्ंशेषु श्रयद्ध्वम् । देवास्त्रिरेकादशा-स्त्रि-स्त्रयस्त्रिग्ंशाः ।

उत्तरे भवत । उत्तर वर्त्मान उत्तर सत्त्वानः । यत्काम इदं जुहोमि ।

तन्मे समृद्ध्यताम् । वयग्स्याम पतयो रयीणाम् । भू-र्भुव-स्व-स्वाहा ॥ (अस्त्राय फट्)

भूर्भुवस्सुवरोमिति दिग्बन्धः ॥

॥ पञ्चाङ्ग जपः ॥ १५ ॥

हग्ंसश्-शुचिषद्-वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्-दुरोणसत् ।

नृषद्-वरसद्-ऋतसद्-व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥

प्रतद्विष्णुस्स्तव ते वीर्याय । मृगो न भीमः कुचरो गिरिष्ठाः ।

यस्यो रुषु त्रिषु विक्रमणेषु । अधिक्षियन्ति भुवनानि विश्वा ।

त्र्यंबकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्यो-र्मुक्षीय माऽमृतात् ॥

तत् सवितुर्वृणीमहे । वयं देवस्य भोजनम् । श्रेष्ठग् सर्व धातमम् । तुरं -भगस्य धीमहि ॥

विष्णुर्योनिं कल्पयतु । त्वष्टा रूपाणि पिग्ंशतु ।आसिञ्चतु प्रजापतिः । धाता गर्भं दधातु ते ॥

॥ अष्टाङ्ग प्रणामः ॥ १६ ॥

हिरण्यगर्भस्-समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।

स दाधार पृथिवीं-द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ उमामहेश्वराभ्यां नमः ॥

यः प्राणतो निमिषतो महित् एक इद्राजा जगतो बभूव ।

य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम । उमामहेश्वराभ्यां नमः ॥

ब्रह्मजज्ञानं प्रथमं पुरस्ताद्-विसीमत-स्सुरुचो वेन आवः ।

स बुध्निया उपमा अस्य विष्टास्सतश्च योनि-मसतश्च विवः । उमामहेश्वराभ्यां नमः ॥

मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतान्नो भरीमभिः । उमामहेश्वराभ्यां नमः ॥

उपश्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत् ।

स दुन्दुभे सजूरिन्द्रेण देवैर्-दूराद्दवीयो अपसेध शत्रून् ॥ उमामहेश्वराभ्यां नमः ॥

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नम उक्तिं विधेम । उमामहेश्वराभ्यां नमः ॥
या ते अग्ने रुद्रिया तनूस्तया नः पाहि तस्यास्ते स्वाहा ।
या ते अग्ने ऽयाशया रजाशया हराशया तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीन्त्वेषं वचो अपावधीग्ग् स्वाहा ॥
उमामहेश्वराभ्यां नमः ॥
इमं यम-प्रस्तरमाहि सीदाङ्गिरोभिः पितृभिस्संविदानः ।
आत्वा मन्त्राः कविशस्ता वहन्त्वेना राजन् हविषा मादयस्व ॥ उमामहेश्वराभ्यां नमः ॥
उरसा शिरसा दृष्ट्या मनसा वचसा तथा ।
पद्भ्यां कराभ्यां कर्णाभ्यां प्रणामोऽष्टाङ्ग उच्यते ॥ उमामहेश्वराभ्यां नमः ॥

## ॥ साम्बपरमेश्वर - षोडशोपचार - पूजा ॥ १८ ॥

ध्यायेन्-निरामयं वस्तु सर्गस्थिति-लयादिकम् ।
निर्गुणं निष्कळं नित्यं मनोवाचा-मगोचरम् ॥
गङ्गाधरं शशिधरं जटामकुट शोभितम् ।
श्वेतभूति-त्रिपुण्ड्रेण विराजित-ललाटकम् ॥
लोचनत्रय-संपन्नं स्वर्ण-कुण्डल-शोभितम् ।
स्मेराननं चतुर्बाहुं मुक्ता-हारोप-शोभितम् ॥
अक्षमालां सुधाकुंभं चिन्मयीं मुद्रिकामपि ।
पुस्तकं च भुजैर्दिव्यैः दधानं पार्वतीपतिम् ॥
श्वेताम्बरधरं श्वेतं रत्नसिंहासन-स्थितम् ।
सर्वाभीष्ट-प्रदातारं वटमूल-निवासिनम् ॥
वामाङ्गे संस्थितां गौरीं बालार्कायुत सन्निभम् ॥
जपाकुसुम-साहस्र-समान-श्रिय-मीश्वरीम् ।
सुवर्ण-रत्नखचित-मुकुटेन विराजिताम् ॥
ललाटपट्ट-संराजत् संलग्न-तिलकांचिताम् ।

राजीवायत–नेत्रान्तां नीलोत्पलदलेक्षणाम् ॥

सन्तप्त–हेमरचित ताटंकाभरणान्विताम् ।

ताम्बूल–चर्वण–रत–रक्तजिह्वा–विराजिताम् ॥

पताकाभरणोपेतां मुक्ता–हारोप–शोभिताम् ।

स्वर्ण–कंकण–संयुक्तैः चतुर्भि–र्बाहुभि–र्युताम् ॥

सुवर्णा–रत्न–खचित कांचीदाम–विराजिताम् ।

कदली–ललितस्तम्भ सन्निभोरु–युगान्विताम् ॥

श्रिया विराजितपदां भक्तत्राण–परायणाम् ।

अन्योन्याश्लिष्ट हृद्बाहु गौरीशंकर–संज्ञकम् ॥

सनातनं परं ब्रह्म परमात्मान–मव्ययम् ।

आवाहयामि जगतां ईश्वरं परमेश्वरम् ॥

मङ्गळाय धनं देवं युवानं अतिसुन्दरम् ।

ध्यायेत् कल्पतरूर्मूले सुखासीनं शहो मया ॥

## ॥ श्रीरुद्रनाम त्रिशति ॥

नमो हिरण्यबाहवे नमः । सेनान्ये नमः । दिशां च पतये नमः ।

नमो वृक्षेभ्यो नमः । हरिकेशेभ्यो नमः । पशूनां पतये नमः ।

नमः सस्पिञ्जराय नमः । त्विषीमते नमः । पथीनां पतये नमः ।

नमो बभ्लुशाय नमः । विव्याधिने नमः । अन्नानां पतये नमः ।

नमो हरिकेशाय नमः । उपवीतिने नमः । पुष्टाणां पतये नमः ।

नमो भवस्य हेत्यै नमः । जगतां पतये नमः । नमो रुद्राय नमः ।

आततविने नमः । क्षेत्राणां पतये नमः । नमः सूताय नमः ।

अहन्त्याय नमः । वनानां पतये नमः । नमो रोहिताय नमः ।

स्थपतये नमः । वृक्षाणं पतये नमः । नमो मन्त्रिणे नमः ।

वाणिजाय नमः । कक्षाणां पतये नमः । नमो भुवन्तये नमः ।

वारिवस्कृताय नमः । ओषधीनां पतये नमः । नम उच्चैर्घोषाय नमः ।

आक्रन्दयते नमः । पत्तीनाम् पतये नमः । नमः कृत्स्नवीताय नमः ।

धावते नमः । सत्वनां पतये नमः ॥ ३८

नमः सहमानाय नमः । निव्यादिने नमः । आव्याधिनीनां पतये नमः ।

नमः ककुभाय नमः । निषंगिणे नमः । स्तेनानां पतये नमः ।

नमो निषंगिणे नमः । इषुधिमते नमः । तस्कराणां पतये नमः ।

नमो वञ्चते नमः । परिवञ्चते नमः । स्तायूनां पतये नमः ।

नमो निचेरवे नमः । परिचराय नमः । अरण्यानां पतये नमः ।

नमः सृकाविभ्यो नमः । जिघाग्ंसद्भ्यो नमः । मुष्णतां पतये नमः ।

नमोऽसिमद्भ्यो नमः । नक्तंचरद्भ्यो नमः । प्रकृन्तानां पतये नमः ।

नम उष्णीषिणे नमः । गिरिचराय नमः । कुलुञ्चानां पतये नमः ।

नम इषुमद्भ्यो नमः । धन्वाविभ्यश्च नमः । वो नमः ।

नम आतन्वानेभ्यो । प्रतिदधानेभ्यश्च नमः । वो नमः ।

नम आयच्छद्भ्यो नमः । विसृजद्भ्यश्च नमः । वो नमः ।

नमोऽस्यद्भ्यो नमः । विध्यद्भ्यश्च नमः । वो नमः ।

नम आसीनेभ्यो नमः । शयानेभ्यश्च नमः । वो नमः ।

नमः स्वपद्भ्यो नमः । जाग्रद्भ्यश्च नमः । वो नमः ।

नमस्तिष्ठद्भ्यो नमः । धावद्भ्यश्च नमः । वो नमः ।

नमस्सभाभ्यो नमः । सभापतिभ्यश्च नमः । वो नमः ।

नमो अश्वेभ्यो नमः । अश्वपतिभ्यश्च नमः । वो नमः ॥ ८९

नम आव्यधिनीभ्यो नमः । विविध्यन्तीभ्यश्च नमः । वो नमः ।

नम उगणाभ्यो नमः । तृग्ंहतीभ्यश्च नमः । वो नमः ।

नमो गृत्सेभ्यो नमः । गृत्सपतिभ्यश्च नमः । वो नमः ।

नमो व्रातेभ्यो नमः । व्रातपतिभ्यश्च नमः ॥ १०० ॥ वो नमः ।

नमो गणेभ्यो नमः । गणपतिभ्यश्च नमः । वो नमः ।

नमो विरूपेभ्यो नमः । विश्वरुपेभ्यश्च नमः । वो नमः ।

नमो महद्भ्यो नमः । क्षुल्लकेभ्यश्च नमः । वो नमः ।

नमो रथिभ्यो नमः । अरथेभ्यश्च नमः । वो नमः ।

नमो रथेभ्यो नमः । रथपतिभ्यश्च नमः । वो नमः ।

नमस्सेनाभ्यो नमः । सेननिभ्यश्च नमः । वो नमः ।

नमः क्षत्तृभ्यो नमः । संग्रहीतृभ्यश्च नमः । वो नमः ।

नमस्तक्षभ्यो नमः । रथकारेभ्यश्च नमः । वो नमः ।

नमः कुलालेभ्यो नमः । कर्मारेभ्यश्च नमः । वो नमः ।

नमः पुञ्जिष्टेभ्यो नमः । निषादेभ्यश्च नमः । वो नमः ।

नम इषुकृद्भ्यो नमः । धन्वकृद्भ्यश्च नमः । वो नमः ।

नमो मृगयुभ्यो नमः । श्वनिभ्यश्च नमः । वो नमः ।

नमः श्वभ्यो नमः । श्वपतिभ्यश्च नमः । वो नमः ॥ १४०

नमो भवाय च नमः । रुद्राय च नमः । नमश्शर्वाय च नमः ।

पशुपतये च नमः । नमो नीलग्रीवाय च नमः । शितिकण्ठाय च नमः ।

नमः कपर्दिने च नमः । व्युप्तकेशाय च नमः । नमस्सहस्राक्षाय च नमः ।

शतधन्वने च नमः । नमो गिरिशाय च नमः । शिपिविष्टाय च नमः ।

नमो मीढुष्टमाय च नमः । इषुमते च नमः । नमो ह्रस्वाय च नमः ।

वामनाय च नमः । नमो बृहते च नमः । वर्षीयसे च नमः ।

नमो वृद्धाय च नमः । संवृध्वने च नमः । नमो अग्रियाय च नमः ।

प्रथमाय च नमः । नम आशवे च नमः । अजिराय च नमः ।

नमः शीघ्रियाय च नमः । शीभ्याय च नमः । नम ऊर्म्याय च नमः ।

अवस्वन्याय च नमः । नमः स्त्रोतस्याय च नमः । द्वीप्याय च नमः ॥ १७०

नमो ज्येष्ठाय च नमः । कनिष्ठाय च नमः । नमः पूर्वजाय च नमः ।

अपरजाय च नमः । नमो मध्यमाय च नमः । अपगल्भाय च नमः ।

नमो जघन्याय च नमः । बुध्नियाय च नमः । नमः सोभ्याय च नमः ।

प्रतिसर्याय च नमः । नमो याम्याय च नमः । क्षेम्याय च नमः ।

नम उर्वर्याय च नमः । खल्याय च नमः । नमः श्लोक्याय च नमः ।

अवसान्याय च नमः । नमो वन्याय च नमः । कक्ष्याय च नमः ।

नमः श्रवाय च नमः । प्रतिश्रवाय च नमः । नम आशुषेणाय च नमः ।

आशुरथाय च नमः । नमः शूराय च नमः । अवभिन्दते च नमः ।

नमो वर्मिणे च नमः । वरूथिने च नमः । नमो बिल्मिने च नमः ।

कवचिने च नमः । नमश्श्रुताय च नमः । श्रुतसेनाय च नमः ॥ २००

नमो दुन्दुभ्याय च नमः । आहनन्याय च नमः । नमो धृष्णवे च नमः ।

प्रमृशाय च नमः । नमो दूताय च नमः । प्रहिताय च नमः ।

नमो निषङ्गिणे च नमः । इषुधिमते च नमः । नमस्तीक्ष्णेषवे च नमः ।

आयुधिने च नमः । नमः स्वायुधाय च नमः । सुधन्वने च नमः ।

नमः स्रुत्याय च नमः । पथ्याय च नमः । नमः काट्याय च नमः ।

नीप्याय च नमः । नमस्सूद्याय च नमः । सरस्याय च नमः ।

नमो नाद्याय च नमः । वैशन्ताय च नमः । नमः कूप्याय च नमः ।

अवट्याय च नमः । नमो वर्ष्याय च नमः । अवर्ष्याय च नमः ।

नमो मेघ्याय च नमः । विद्युत्याय च नमः । नम ईध्रियाय च नमः ।

आतप्याय च नमः । नमो वात्याय च नमः । रेष्मियाय च नमः ।

नमो वास्तव्याय च नमः । वास्तुपाय च नमः ॥ २३२

नमस्सोमाय च नमः । रुद्राय च नमः । नमस्ताम्राय च नमः ।

अरुणाय च नमः । नमः शङ्गाय च नमः । पशुपतये च नमः ।

नम उग्राय च नमः । भीमाय च नमः । नमो अग्रेवधाय च नमः ।

दूरेवधाय च नमः । नमो हन्त्रे च नमः । हनीयसे च नमः ।

नमो वृक्षेभ्यो नमः । हरिकेशेभ्यो नमः । नमस्ताराय नमः ।

नमश्शंभवे च नमः । मयोभवे च नमः । नमश्शंकराय च नमः ।

मयस्कराय च नमः । नमः शिवाय च नमः । शिवतराय च नमः ।

नमस्तीर्थ्याय च नमः । कूल्याय च नमः । नमः पार्याय च नमः ।

अवार्याय च नमः । नमः प्रतरणाय च नमः । उत्तरणाय च नमः ।

नम आतार्याय च नमः । आलाद्याय च नमः । नमः शष्प्याय च नमः ।

फेन्याय च नमः । नमः सिकत्याय च नमः । प्रवाह्याय च नमः ॥ २६५

नम इरिण्याय च नमः । प्रपथ्याय च नमः । नमः किँशिलाय च नमः ।

क्षयणाय च नमः । नमः कपर्दिने च नमः । पुलस्तये च नमः ।

नमो गोष्ठ्याय च नमः । गृह्याय च नमः । नमस्तल्प्याय च नमः ।

गेह्याय च नमः । नमः काट्याय च नमः । गह्वरेष्ठाय च नमः ।

नमो हृदय्याय च नमः । निवेष्प्याय च नमः । नमः पाग्ंसव्याय च नमः ।

रजस्याय च नमः । नमः शुष्क्याय च नमः । हरित्याय च नमः ।

नमो लोप्याय च नमः । उलप्याय च नमः । नम ऊर्व्याय च नमः ।

सूर्म्याय च नमः । नमः पर्ण्याय च नमः । पर्णशद्याय च नमः ।

नमोपगुरमाणाय च नमः । अभिघ्नते च नमः । नम आक्खिदते च नमः ।

प्रक्खिदते च नमः । नमो वो नमः । किरिकेभ्यो नमः ।

देवानाग्ं हृदयेभ्यो नमः । नमो विक्षीणकेभ्यो नमः ।

नमो विचिन्वत्केभ्यो नमः । नम आनिर्हतेभ्यो नमः ।

नम आमीवत्केभ्यो नमः ॥ ३००

ॐ भवाय देवाय नमः ।

ॐ शर्वाय देवाय नमः ।

ॐ ईशानाय देवाय नमः ।

ॐ पशुपतये देवाय नमः ।

ॐ रुद्राय देवाय नमः ।

ॐ उग्राय देवाय नमः ।

ॐ भीमाय देवाय नमः ।

ॐ महते देवाय नमः ॥

ॐ भवस्य देवस्य पत्न्यै नमः ।

ॐ शर्वस्य देवस्य पत्न्यै नमः ।

ॐ ईशानस्य देवस्य पत्न्यै नमः ।

ॐ पशुपतेः देवस्य पत्न्यै नमः ।

ॐ रुद्रस्य देवस्य पत्न्यै नमः ।

ॐ उग्रस्य देवस्य पत्न्यै नमः ।

ॐ भीमस्य देवस्य पत्न्यै नमः ।

ॐ महतो देवस्य पत्न्यै नमः ।

## Sri Rudra Kramam

ॐ गणानांत्वा ।

ॐ दिव्याङ्गायै नमः
ॐ मालिन्यै नमः
ॐ महाकाळ्यै नमः
ॐ महापाशायै नमः
ॐ महाकारायै नमः 20
ॐ महांकुशायै नमः
ॐ विनीतायै नमः
ॐ विमलायै नमः
ॐ विश्वायै नमः
ॐ विद्युन्मालायै नमः
ॐ विलासिन्यै नमः
ॐ चण्डिकायै नमः
ॐ चन्द्रवदनायै नमः
ॐ चन्द्रलेखा–विभूषितायै नमः
ॐ सावित्र्यै नमः 30
ॐ सुरसायै नमः
ॐ दिव्यायै नमः
ॐ दिव्यालंकार–भूषितायै नमः
ॐ वाग्देव्यै नमः
ॐ वसुधायै नमः
ॐ तीव्रायै नमः
ॐ महाभोगायै नमः
ॐ महाबलायै नमः
ॐ गोदावर्यै नमः
ॐ गोमत्यै नमः 40
ॐ जटिलायै नमः
ॐ विन्ध्य–वासिन्यै नमः
ॐ गर्जिन्यै नमः
ॐ भेदिन्यै नमः
ॐ प्रीतायै नमः
ॐ सौदामिन्यै नमः
ॐ भोगदायै नमः
ॐ सत्यवादिन्यै नमः
ॐ सुधामूर्त्यै नमः
ॐ सुभद्रायै नमः 50
ॐ सुरवन्दितायै नमः
ॐ यमुनायै नमः
ॐ सुप्रभायै नमः
ॐ निद्रायै नमः
ॐ सत्यायै नमः
ॐ नीरजलोचनायै नमः

ॐ त्रिमूर्त्यै नमः
ॐ त्रिकालज्ञायै नमः
ॐ ब्रह्मिष्ठायै नमः
ॐ त्रिगुणात्मिकायै नमः 60
ॐ महाशान्त्यै नमः
ॐ महाविद्यायै नमः
ॐ धारिण्यै नमः
ॐ सर्वात्मिकायै नमः
ॐ शास्त्र–रूपायै नमः
ॐ शुंभासुर मर्दिन्यै नमः
ॐ पद्मासनायै नमः
ॐ पद्महस्तायै नमः
ॐ रक्तबीजनिहन्त्र्यै नमः
ॐ धूम्रलोचन दर्पघ्न्यै नमः 70
ॐ निशुम्भप्राणहारिण्यै नमः
ॐ चामुण्डायै नमः
ॐ चण्डहन्त्र्यै नमः
ॐ मुण्डकाय–प्रभेदिन्यै नमः
ॐ सुप्रभायै नमः
ॐ काळरात्र्यै नमः
ॐ सर्वदेवस्तुतायै नमः
ॐ अनघायै नमः
ॐ पञ्चाशद्वर्णरूपायै नमः
ॐ सुधाकलशधारिण्यै नमः
ॐ ब्राहम्यै नमः
ॐ माहेश्वर्यै नमः
ॐ कौमार्यै नमः
ॐ वैष्णव्यै नमः
ॐ वाराह्यै नमः
ॐ माहेन्द्र्यै नमः
ॐ चामुण्डायै नमः
ॐ चित्राम्बर–विभूषितायै नमः
ॐ चित्रमालाधरायै नमः
ॐ कान्तायै नमः 90
ॐ चित्रगन्धानु लेपनायै नमः
ॐ अक्षमालाधरायै नमः
ॐ नित्यायै नमः
ॐ रूपसौभाग्यदायिन्यै नमः
ॐ श्वेताननायै नमः
ॐ नीलभुजायै नमः
ॐ पीवरस्तन–मण्डितायै नमः
ॐ सूक्ष्ममध्यायै नमः
ॐ रक्तपादायै नमः
ॐ उन्मदायै नमः 100
ॐ नील–जङ्घिकायै नमः
ॐ बुद्धि–रूपायै नमः
ॐ तुष्टि–रूपायै नमः
ॐ निद्रा–रूपायै नमः
ॐ पुष्टि–रूपायै नमः
ॐ चतुरानन जायायै नमः
ॐ चतुर्वर्ग–फलप्रदायै नमः
ॐ श्री शारदाम्बिकायै नमः 108

**Sri Siva Ashottarashatanamavali**

॥ शिवाष्टोत्तरशत नामावली ॥

श्री गुरुभ्यो नमः । श्री गणेशाय नमः । श्री शारदाम्बिकायै नमः ।

1. ॐ महाकैलास शिखर निलयाय नमो नमः ।
2. ॐ हिमाचलेन्द्र तनया वल्लभाय नमो नमः ।
3. ॐ वामभाग कळत्रार्ध शरीराय नमो नमः ।
4. ॐ विलसद्दिव्य कर्पूर गौराङ्गाय नमो नमः ।
5. ॐ कोटि कन्दर्प सदृश लावण्याय नमो नमः ।
6. ॐ रत्न मौक्तिक वैडूर्य किरीटाय नमो नमः ।
7. ॐ मन्दागिनी जलोपेत मूर्धजाय नमो नमः ।
8. ॐ चारु शीतांशु सकल शेखराय नमो नमः ।
9. ॐ त्रिपुंड्र विलसत्भाल फलकाय नमो नमः ।
10. ॐ सोमपावक मार्ताण्ड लोचनाय नमो नमः ।
11. ॐ वासुकी तक्षक लसत्कुण्डलाय नमो नमः ।
12. ॐ चारु प्रसन्न सुस्मेर वदनाय नमो नमः ।
13. ॐ समुद्रोद्भूत गरळ कन्थराय नमो नमः ।
14. ॐ कुरङ्ग विलसत् पाणि कमलाय नमो नमः ।
15. ॐ परश्वथ लसद्दिव्य कराब्जाय नमो नमः ।
16. ॐ वराऽभय प्रदकर युगलाय नमो नमः ।
17. ॐ अनेकरत्न माणिक्य सुहाराय नमो नमः ।
18. ॐ मुक्ता सुवर्ण रुद्राक्ष मालिकाय नमो नमः ।
19. ॐ हिरण्य किङ्किणीयुक्त कङ्कणाय नमो नमः ।
20. ॐ मन्दार मल्लिकादाम भूषिताय नमो नमः ।
21. ॐ मत्तमातङ्ग सत्कृत्ति वसनाय नमो नमः ।
22. ॐ नागेन्द्र यज्ञोपवीत शोभनाय नमो नमः ।
23. ॐ सौदामिनी समच्छाय सुवस्त्राय नमो नमः ।
24. ॐ सिञ्जीर मणि मञ्जीर चरणाय नमो नमः ।
25. ॐ चक्राब्जध्वज युक्तांघ्रि सरोजाय नमो नमः ।
26. ॐ अपर्णाकुच कस्तूरी रञ्जिताय नमो नमः ।

27. ॐ गुहमत्तेभ वदन जनकाय नमो नमः ।
28. ॐ बिडौजा विधि वैकुण्ठ नमिताय नमो नमः ।
29. ॐ कमला पार्वतीन्द्राणी सेविताय नमो नमः ।
30. ॐ महा पञ्चाक्षरी मन्त्र स्वरूपाय नमो नमः ।
31. ॐ सहस्रकोटि तपन सङ्काशाय नमो नमः ।
32. ॐ अनेककोटि शीतांशु प्रकाशाय नमो नमः ।
33. ॐ कैलास तुल्य वृषभ वाहनाय नमो नमः ।
34. ॐ नन्दी भृङ्गी मुखानेक संस्तुताय नमो नमः ।
35. ॐ निज पादांबुजासक्त सुलभाय नमो नमः ।
36. ॐ प्रारब्ध जन्म मरण मोचनाय नमो नमः ।
37. ॐ संसार भय दुःखौघ भेषजाय नमो नमः ।
38. ॐ ब्रह्मादि कीड पर्यन्त व्यापकाय नमो नमः ।
39. ॐ चराचर स्थूल सूक्ष्म कल्पकाय नमो नमः ।
40. ॐ सर्वं सह महाचक्र स्यन्दनाय नमो नमः ।
41. ॐ सुधाकर जगच्छक्षु रथाङ्गाय नमो नमः ।
42. ॐ सामाथर्व– ऋग्यजुर्वेद तुरगाय नमो नमः ।
43. ॐ सरसीरुह संजात प्राप्त सारथये नमो नमः ।
44. ॐ वैकुण्ठनाथ ज्वलन सायकाय नमो नमः ।
45. ॐ चामीकर महाशैल कार्मुकाय नमो नमः ।
46. ॐ भुजङ्ग राज विलसत् सिंजिनीकृत्तये नमो नमः ।
47. ॐ निजाक्षिजाग्नि सन्दग्ध त्रिपुराय नमो नमः ।
48. ॐ जालांथराऽसुरशिर–च्छेदनाय नमो नमः ।
49. ॐ मुरारि नेत्र पूज्यांघ्रि पङ्कजाय नमो नमः ।
50. ॐ सहस्र भानु सङ्काश चक्रदाय नमो नमः ।
51. ॐ कृतान्तक महादर्प शमनाय नमो नमः ।
52. ॐ मार्कण्डेय मनोऽभीष्ट वरदाय नमो नमः ।
53. ॐ ज्वलज्ज्वालावली भीम विषघ्नाय नमो नमः ।
54. ॐ शिक्षकान्थक दैतेय विक्रमाय नमो नमः ।
55. ॐ शंबरान्तक लावण्य देहसंहारिणे नमो नमः ।
56. ॐ रतिप्रार्थित माङ्गल्य फलदाय नमो नमः ।
57. ॐ स्वद्रोहि दक्ष सवन विघाताय नमो नमः ।

58. ॐ सनकादि समायुक्त दक्षिणामूर्तये नमो नमः ।
59. ॐ घोरापस्मार दनुज शमनाय नमो नमः ।
60. ॐ अनन्त वेद वेदान्त संवेद्याय नमो नमः ।
61. ॐ नासाग्रन्यस्त निडिल नयनाय नमो नमः ।
62. ॐ उपमन्यु महामोह भञ्जनाय नमो नमः ।
63. ॐ केशव ब्रह्म संग्राम वारकाय नमो नमः ।
64. ॐ द्रुहिणांभोज नयन दुर्लभाय नमो नमः ।
65. ॐ धर्मार्थ काम कैवल्य सूचकाय नमो नमः ।
66. ॐ उत्पत्ति स्थिति संहार कारणाय नमो नमः ।
67. ॐ अनन्तकोटि ब्रह्माण्ड नायकाय नमो नमः ।
68. ॐ महाकोलाहलोदार शरभाय नमो नमः ।
69. ॐ नरसिंह महाकोप शमनाय नमो नमः ।
70. ॐ प्रपञ्च नाश कल्पान्त भैरवाय नमो नमः ।
71. ॐ हिरण्यगर्भोत्तमाङ्ग निर्जिताय नमो नमः ।
72. ॐ पतञ्जली व्याघ्रपाद सन्नुताय नमो नमः ।
73. ॐ महाताण्डव चातुर्य पण्डिताय नमो नमः ।
74. ॐ विमल प्रणवाकाश मध्यगाय नमो नमः ।
75. ॐ महापातक तूलौघ पावकाय नमो नमः ।
76. ॐ चण्डीश दोष विच्छेद प्रवीणाय नमो नमः ।
77. ॐ रजस्तमस्सत्व गुण संयुक्ताय नमो नमः ।
78. ॐ दारुका वन मौनि स्त्री मोहिताय नमो नमः ।
79. ॐ शाश्वतैश्वर्य विभव सहिताय नमो नमः ।
80. ॐ अखण्ड सच्छिदानन्द विग्रहाय नमो नमः ।
81. ॐ अशेष देवताराध्य पादुकाय नमो नमः ।
82. ॐ अपाकृत महादिव्य पुरस्थाय नमो नमः ।
83. ॐ भूम्यप्तेजो वाय्वाकाश तुरीयाय नमो नमः ।
84. ॐ वसुन्धरा महाभार मुदिताय नमो नमः ।
85. ॐ देवकीसुत कौन्तेय वरदाय नमो नमः ।
86. ॐ अज्ञान तिमिर ध्वंस भास्कराय नमो नमः ।
87. ॐ अद्वयानन्द विज्ञान सुखदाय नमो नमः ।
88. ॐ अविद्योपाधि रहित निर्गुणाय नमो नमः ।

89. ॐ सप्तकोटि महामन्त्र पूरिताय नमो नमः ।
90. ॐ शब्द स्पर्शन गन्धादि साधनाय नमो नमः ।
91. ॐ अक्षरक्षर कूडस्थ परमाय नमो नमः ।
92. ॐ षोडशाब्द वयोपेत दिव्याङ्गाय नमो नमः ।
93. ॐ सहजानन्द सन्दोह संयुक्ताय नमो नमः ।
94. ॐ सहस्राक्षर महापद्म मण्डिताय नमो नमः ।
95. ॐ अनन्तानन्द बोधांबु निधिस्थाय नमो नमः ।
96. ॐ अकारादि क्षकारान्त वर्णस्थाय नमो नमः ।
97. ॐ निस्तूलौदार्य सौभाग्य प्रबलाय नमो नमः ।
98. ॐ कैवल्य परमानन्द नियोगाय नमो नमः ।
99. ॐ हिरण्य ज्योतिर् विभ्राजत् सुप्रभाय नमो नमः ।
100. ॐ ज्योतिषामुत्तम ज्योती रूपदाय नमो नमः ।
101. ॐ अनौपम्य महासौख्य पदस्थाय नमो नमः ।
102. ॐ अचिन्त्य दिव्य महिमा रञ्जिताय नमो नमः ।
103. ॐ अनित्य देह विभ्रान्ति वर्जिताय नमो नमः ।
104. ॐ सकृत्प्रसन्न दौर्भाग्य भेदनाय नमो नमः ।
105. ॐ षड्त्रिंशत् तत्व प्रासाद भूनाथाय नमो नमः ।
106. ॐ आदिमध्यान्त रहित देहस्थाय नमो नमः ।
107. ॐ परानन्द स्वरूपार्थ बोधकाय नमो नमः ।
108. ॐ इच्छाज्ञान क्रिया शक्ति नियुक्ताय नमो नमः ।
109. ॐ पाशशक्ती समायुक्त परमेश्वराय नमो नमः ।

इति श्री शिवरहस्योक्त शिवाष्टोत्तरशत नामावळी समाप्तं ॥
शुभं भवतु ॥
हरिः ॐ

**Sri Shankaracharya Ashottarashatanamavali**

॥ श्री शङ्करभगवत्पादाचर्य अष्टोत्तरशत नामावलिः ॥

नित्यानन्दं परमसुखदं केवलं ज्ञानमूर्तिं
विश्वातीतं गगनसदृशं तत्वमस्यादिलक्ष्यं ।
एकं नित्यं विमलमचलं सर्वधीसाक्षितभूतं
भावातीत त्रिगुणरहितं सद्गुरुं तं नमामि ॥

1) ॐ श्री शङ्कराचार्यवर्याय नमः
2) ॐ ब्रह्मानन्दप्रदायकाय नमः
3) ॐ अज्ञानतिमिरादित्याय नमः
4) ॐ सुज्ञानाम्बुधि–चन्द्रमसे नमः
5) ॐ वर्णाश्रम प्रतिष्ठात्रे नमः
6) ॐ श्रीमते नमः
7) ॐ मुक्तिप्रदायकाय नमः
8) ॐ शिष्योपदेश निरताय नमः
9) ॐ भक्ताभीष्ट प्रदायकाय नमः
10) ॐ सूक्ष्म–तत्त्व–रहस्यज्ञाय नमः
11) ॐ कार्याकार्यप्रबोधकाय नमः
12) ॐ ज्ञान–मुद्राञ्चितकराय नमः
13) ॐ शिष्यहृत्ताप–हाराकाय नमः
14) ॐ परिव्राज्याश्रमोद्धर्त्रे नमः
15) ॐ सर्वतन्त्रस्वतन्त्रधिये नमः
16) ॐ अद्वैत–स्थापनाचार्याय नमः
17) ॐ साक्षाच्छङ्कर रूपभृते नमः
18) ॐ षण्मत–स्थापनाचार्याय नमः
19) ॐ त्रयीमार्ग प्रवर्तकाय नमः
20) ॐ वेदवेदान्त–तत्त्वज्ञाय नमः
21) ॐ दुर्वादिमत–खण्डनाय नमः
22) ॐ वैराग्यनिरताय नमः
23) ॐ शान्ताय नमः
24) ॐ संसारार्णव–तारकाय नमः
25) ॐ प्रसन्न–वदनाम्भोजाय नमः
26) ॐ परमार्थ–प्रकाशकाय नमः
27) ॐ पुराण–स्मृति–सारज्ञाय नमः
28) ॐ नित्यतृप्ताय नमः
29) ॐ महते नमः
30) ॐ शुचये नमः
31) ॐ नित्यानन्दाय नमः
32) ॐ निरातङ्काय नमः
33) ॐ निस्सङ्गाय नमः
34) ॐ निर्मलात्मकाय नमः
35) ॐ निर्ममाय नमः
36) ॐ निरहङ्काराय नमः
37) ॐ विश्ववन्द्य–पदाम्बुजाय नमः
38) ॐ सत्त्वप्रधानाय नमः
39) ॐ सद्भावाय नमः
40) ॐ सङ्ख्यातीत–गुणोज्ज्वलाय नमः
41) ॐ अनघाय नमः
42) ॐ सारहृदयाय नमः
43) ॐ सुधियै नमः
44) ॐ सारस्वत प्रदाय नमः
45) ॐ सत्यात्मने नमः
46) ॐ पुण्यशीलाय नमः
47) ॐ सांख्ययोग–विचक्षणाय नमः
48) ॐ तपोराशये नमः
49) ॐ महातेजसे नमः
50) ॐ गुणत्रयविभागविदे नमः

51) ॐ कलिघ्नाय नमः
52) ॐ कालकर्मज्ञाय नमः
53) ॐ तमोगुण–निवारकाय नमः
54) ॐ भगवते नमः
55) ॐ भारतीजेत्रे नमः
56) ॐ शारदाह्वान–पण्डिताय नमः
57) ॐ धर्माधर्मविभागज्ञाय नमः
58) ॐ लक्ष्यभेद–प्रदर्शकाय नमः
59) ॐ योगिहृत्पद्म–भास्कराय नमः
60) ॐ नादबिन्दुकलाभिज्ञाय नमः
61) ॐ अतीन्द्रिय ज्ञाननिधये नमः
62) ॐ नित्यानित्यविवेकवते नमः
63) ॐ सदानन्दाय नमः
64) ॐ चिन्मयात्मने नमः
65) ॐ परकायप्रवेशकृते नमः
66) ॐ अमानुष–चरित्राढ्याय नमः
67) ॐ क्षेमदायिने नमः
68) ॐ क्षमकारय नमः
69) ॐ भव्याय नमः
70) ॐ भद्रप्रदाय नमः
71) ॐ भूरिमहिम्ने नमः
72) ॐ विश्वरञ्जकाय नमः
73) ॐ स्वप्रकाशाय नमः
74) ॐ सदाधाराय नमः
75) ॐ विश्वबन्धवे नमः
76) ॐ शुभोदयाय नमः
77) ॐ विशाल कीर्तये नमः
78) ॐ वागीशाय नमः
79) ॐ सर्वलोकहितोत्सुकाय नमः
80) ॐ कैलासयात्र संप्राप्त
चन्द्रमौलि–प्रपूजकाय नमः
81) ॐ काञ्च्यां श्रीचक्र राजाख्य यन्त्र
स्थापन दीक्षिताय नमः
82) ॐ श्रीचक्रात्मक ताटङ्क तोषिताम्बा
मनोरथाय नमः
83) ॐ ब्रह्मसूत्रोपनिषद् भाष्यादि
ग्रन्थकल्पकाय नमः
84) ॐ चतुर्दिक् चतुराम्नाय प्रतिष्ठात्रे
नमः
85) ॐ महामतये नमः
86) ॐ द्विसप्तति मतोच्छेत्रे नमः
87) ॐ सर्वदिग्विजय प्रभवे नमः
88) ॐ काषायवसनोपेताय नमः
89) ॐ भस्मोद्धूळित–विग्रहाय नमः
90) ॐ ज्ञानात्मकैक–दण्डाढ्याय नमः
91) ॐ कमण्डलुलसत्कराय नमः
92) ॐ गुरु–भूमण्डलाचार्याय नमः
93) ॐ भगवत्पाद संज्ञकाय नमः
94) ॐ व्याससंदर्शन प्रीताय नमः
95) ॐ ऋष्यशृङ्गपुरेश्वराय नमः
96) ॐ सौन्दर्यलहरी मुख्य बहुस्तोत्र
विधायकाय नमः
97) ॐ चतुष्षष्टि कलाभिज्ञाय नमः
98) ॐ ब्रह्मराक्षसमोक्षदाय नमः
99) ॐ श्रीमन्मण्डनमिश्राख्य स्वयंभू
जय सन्नुताय नमः
100) ॐ तोटकाचार्य सम्पूज्याय नमः
101) ॐ पद्मपादार्चिताङ्घ्रिकाय नमः
102) ॐ हस्तामलक योगीन्द्र ब्रह्मज्ञान
प्रदायकाय नमः
103) ॐ सुरेश्वराख्य सच्छिष्य
सन्यासाश्रम दायकाय नमः
104) ॐ नृसिंहभक्ताय नमः
105) ॐ सद्रत्नगर्भ–हेरम्ब पूजकाय नमः
106) ॐ व्याख्या सिंहासनाधीशाय नमः
107) ॐ जगत्पूज्याय नमः
108) ॐ श्रीजगद्गुरवे नमः

**Sri Chandrasekhara Bharati Ashtottara Shatanamavali**

सदात्मध्यान–निरतं विषयेभ्यः पराङ्मुखम् ।

नौमिशास्त्रेषु निष्णातं चन्द्रशेखरभारतीम् ॥

श्रीशृङ्गपुरपीठेशाय नमः

श्रीविद्याजपतत्पराय नमः

सुनन्दनाश्वयुक्कृष्णमघर्क्षैकादशी–भवाय नमः

प्लवाब्दसितमाघीय–पञ्चमी–प्राप्तमौञ्जिकाय नमः

परीधाविशरच्चैत्र–प्राप्त–तुर्याश्रमक्रमाय नमः

चन्द्रशेखर–शब्दाद्यभारत्याख्या–विराजिताय नमः

शङ्करादिगुरूत्तंस–पारम्पर्यक्रमा–गताय नमः

चन्द्रमौलि–पदाम्भोज–चञ्चरीक–हृदम्बुजाय नमः

शारदापद–पाथोजमरन्दास्वाद–लोलुपाय नमः

सुरत्नगर्भ–हेरम्ब–समाराधन–लालसाय नमः –10

देशिकाङ्घ्रि–समाक्रान्त–हृदयाख्य–गुहान्तराय नमः

श्रुतिस्मृति–पुराणादि–शास्त्रप्रामाण्य–बद्धधिये नमः

श्रौतस्मार्त–सदाचार–धर्मपालन–तत्पराय नमः

तत्त्वमस्यादि–वाक्यार्थ–परिचिन्तन–मानसाय नमः

विद्वद्बृन्दपरिश्लाघ्य–पाण्डित्य–परिशोभिताय नमः

दक्षिणामूर्ति–सन्मन्त्रजप–ध्यानपरायणाय नमः

विविधार्ति–परिक्लिन्न–जनसन्दोह–दुःखहृदे नमः

नन्दिताशेष–विबुधाय नमः

निन्दिताखिल–दुर्मताय नमः

विविधागम–तत्त्वज्ञाय नमः –20

विनयाभरणोज्ज्वलाय नमः

विशुद्धाद्वैत–सन्देष्ट्रे नमः

विशुद्धात्म–परायणाय नमः

विश्ववन्द्याय नमः

विश्वगुरवे नमः

विजितेन्द्रिय–संहतये नमः

वीतरागाय नमः

वीतभयाय नमः

वित्तलोभ–विवर्जिताय नमः

नन्दिताशेष–भुवनाय नमः –30

निन्दिताखिलसंसृतये नमः

सत्यवादिने नमः

सत्यरताय नमः

सत्यधर्म–परायणाय नमः

विषयारये नमः

विधेयात्मने नमः

विविक्ताशासु–सेवनाय नमः

विवेकिने नमः

विमलस्वान्ताय नमः

विगताविद्य–बन्धनाय नमः

नतलोकहितैषिणे नमः –40

नम्रहृत्ताप–हारकाय नमः

नम्राज्ञानतमोभानवे नमः

नतसंशयकृन्तनाय नमः

नित्यतृप्ताय नमः

निरीहाय नमः

निर्गुणध्यान–तत्पराय नमः

शान्तवेषाय नमः

शान्तमनसे नमः

शान्तिदान्ति–गुणालयाय नमः

मितभाषिणे नमः –50

मिताहाराय नमः

अमितानन्द–तुन्दिलाय नमः

गुरुभक्ताय नमः
गुरुन्यस्तभाराय नमः
गुरुपदानुगाय नमः
हासपूर्वाभिभाषिणे नमः
हंसमन्त्रार्थ–चिन्तकाय नमः
निश्चिन्ताय नमः
निरहङ्काराय नमः
निर्मोहाय नमः –60
मोहनाशकाय नमः
निर्ममाय नमः
ममताहन्त्रे नमः
निष्पापाय नमः
पापनाशकाय नमः
कृतज्ञाय नमः
कीर्तिमते नमः
पापागभि–दुराकृतये नमः
सत्यसन्धाय नमः
सत्यतपसे नमः –70
सत्यज्ञानसुखात्मधिये नमः
वेदशास्त्रार्थतत्त्वज्ञाय नमः
वेदवेदान्तपारगाय नमः
विशालहृदयाय नमः
वाग्मिने नमः
वाचस्पतिसदृग्भतये नमः
नृसिंहारामनिलयाय नमः
नृसिंहाराधन–प्रियाय नमः
नृपाल्यर्चित–पादाब्जाय नमः
कृष्णराजहिते रताय नमः –80

विच्छिन्नहृदय–ग्रन्थये नमः
झ्विच्छिन्नाखिल–संशयाय नमः
विद्वच्छिरो–भूषणाय नमः
विद्वद्बृन्द–दृढाश्रयाय नमः
भूतिभूषित–सर्वाङ्गाय नमः
नतभूति–प्रदायकाय नमः
त्रिपुण्ड्र–विलसत्फालाय नमः
रुद्राक्षैक–विभूषणाय नमः
कौसुम्भ–वसनोपेताय नमः
करलग्नकमण्डलवे नमः –90
वेणुदण्डलसद्धस्ताय नमः
अप्पवित्र–समन्विताय नमः
दाक्षिण्यनिलयाय नमः
दक्षाय नमः
दक्षिणाशामठाधिपाय नमः
वर्णसङ्कर–सञ्जात–सन्तापाविष्ट–मानसाय नमः
शिष्यप्रबोधनपटवे नमः
नम्रास्तिक्यप्रवर्धकाय नमः
नतालिहितसन्देष्ट्रे नमः
विनेयेष्टप्रदायकाय नमः –100
हितशत्रुसमाय नमः
श्रीमते नमः
समलोष्टाश्म–काञ्चनाय नमः
व्याख्यान–भद्रपीठस्थाय नमः
शास्त्रव्याख्यान–कौतुकाय नमः
जगतीतल–विख्याताय नमः
जगद्गुरवे नमः
श्रीचन्द्रशेखरभारती–महास्वामिने नमः –108

॥ इति श्रीमज्जगद्गुरु श्रीचन्द्रशेखरभारतीमहास्वामिनाम् अष्टोत्तरशतनामावलिः॥

## Siva Kavacham

ध्यानं

अथ: परं सर्वपुराणगुह्यं

निश्शेष पापौघहरं पवित्रं ।

जयप्रदं सर्वविपत् प्रमोचनं

वक्ष्यामि शैवं कवचं हिताय ते ॥

वज्रदंष्ट्रं त्रिनयनं कालकण्ठमरिन्दमं ।

सहस्र करमत्युग्रं वन्दे शंभुं उमापतिं ॥

ऋषभ उवाच---

नमस्कृत्वा महादेवं विश्वव्यापिनमीश्वरं ।

वक्ष्ये शिवमयं वर्म सर्वरक्षाकरं नृणां ॥ 1॥

शुचौ देशे समासीनो यथावत्कल्पितासनः ।

जितेन्द्रियो जितप्राणः चिन्तयेच्छिवमव्ययं ॥ 2॥

ह्रित्पुण्डरीकान्तर सन्निविष्टं

स्वतेजसा व्याप्तनभोऽवकाशं ।

अतीन्द्रियं सूक्ष्ममनन्तमाद्यं

ध्यायेत् परानन्दमयं महेशं ॥ 3॥

ध्यानाव धूताखिलकर्मबन्ध-

श्चिरं चिदानन्द निमग्नचेता: ।

षडक्षरन्यास समाहितात्मा

शैवेन कुर्यात् कवचेन रक्षां ॥ 4॥

मां पातु देवोऽखिल देवतात्मा

संसारकूपे पतितं गभीरे ।

तन्नाम दिव्यं परमन्त्रमूलं

धुनोतु मे सर्वमघं ह्रिदिस्थं ॥ 5॥

सर्वत्र मां रक्षतु विश्वमूर्ति-

ज्योतिर्मयानन्द घनश्चिदात्मा ।

अणोरणीयानुरुशक्तिरेकः

स ईश्वरः पातु भयादशेषात् ॥ 6॥

यो भूस्वरूपेण बिभर्ति विश्वं

पायात्स भूमेर् गिरिशोऽष्टमूर्तिः ।

योपां स्वरूपेणनृणां करोति

संजीवनं सोऽवतु मां जलेभ्यः ॥ 7॥

कल्पावसाने भुवनानि दग्ध्वा

सर्वाणि यो नृत्यति भूरिलीलः ।

स कालरुद्रोऽवतु मां दवाग्नेः

वात्यादिभीतेर्ऽखिलाच्च तापात् ॥ 8॥

प्रदीप्त विद्युत् कनकावभासो

विद्यावराभीति कुठारपाणिः ।

चतुर्मुखस्तत् पुरुषस्त्रिनेत्रः

प्राच्यां स्थितो रक्षतु मामजस्रं ॥ 9॥

कुठार खेटांकुश पाशशूल

कपाल मालाग्नि कणान्दधानः ।

चतुर्मुखो नीलरुचिस्त्रिनेत्रः

पायाद घोरो दिशि दक्षिणस्यां ॥ 10॥

कुन्देन्दु शंख स्फटिकावभासो

वेदाक्षमाला वरदाऽभयाङ्कः ।

त्र्यक्षश्चतुर्वक्त्र उरुप्रभावः

सद्योऽधिजातोऽवतु मां प्रतीच्यां ॥ 11॥

वराक्षमाला भयटङ्क हस्तः

सरोज किञ्जल्क समानवर्णः ।

त्रिलोचनश्चारु चतुर्मुखो मां

पायादुदीच्यां दिशि वामदेवः ॥ 12॥

वेदाऽभयेष्टाङ्कुश टङ्कपाश-

कपाल ढक्काक्षर शूलपाणिः ।

सितद्युतिः पञ्चमुखोऽवतान्मां

ईशान ऊर्ध्वं परम प्रकाशः ॥ 13॥

मूर्धानमव्यान्मम चन्द्रमौलिः

फालं ममाव्याद् अथ फालनेत्रः ।

नेत्रे ममाव्याद् भगनेत्रहारी

नासां सदा रक्षतु विश्वनाथः ॥ 14॥

पायाश्रुती मे श्रुति गीत कीर्तिः
कपोलमव्यात् सततं कपाली ।
वक्त्रं सदा रक्षतु पञ्च वक्त्रो
जिह्वां सदा रक्षतु वेद जिह्वः ॥ 15॥
कण्ठं गिरीशोऽवतु नीलकण्ठः
पाणिद्वयं पातु पिनाकपाणिः ।
दोर्मूल मव्यान्मम धर्मबाहुः
वक्षःस्थलं दक्षमखान्तकोऽव्यात् ॥ 16॥
ममोदरं पातु गिरीन्द्र धन्वा
मध्यं ममाव्यान्मदनान्तकारी ।
हेरंबतातो मम पातुनाभिं
पायात्कटिं धूर्ज्जटिरीश्वरो मे ॥ 17॥
ऊरुद्वयं पातु कुबेर मित्रो
जानुद्वयं मे जगदीश्वरोऽव्यात् ।
जङ्घायुगं पुङ्गवकेतुरव्यात्
पादौ ममाव्यात् सुरवन्द्यपादः ॥ 18॥
महेश्वरः पातु दिनादियामे
मां मध्ययामेऽवतु वामदेवः ।
त्रिलोचनः पातु त्रितीययामे
वृषध्वजः पातु दिनान्त्ययामे ॥ 19॥
पायान्निशादौ शशि शेखरो मां
गंगाधरो रक्षतु मां निशीथे ।
गौरीपतिः पातु निशावसाने
मृत्युञ्जयो रक्षतु सर्वकालं ॥ 20॥
अन्तःस्थितं रक्षतु शङ्करो मां
स्थाणुः सदा पातु बहिःस्थितं मां ।
तदन्तरे पातु पतिः पशूनां
सदाशिवो रक्षतु मां समन्तात् ॥ 21॥
तिष्ठन्तमव्यात् भुवनैकनाथः
पायाद्व्रजन्तं प्रमथाधिनाथः ।
वेदान्तवेद्योऽवतु मां निषण्णं
मामव्ययः पातु शिवश्शयानं ॥ 22॥
मार्गेषु मां रक्षतु नीलकण्ठः
शैलादि दुर्गेषु पुरत्रयारिः ।
अरण्य वासादि महाप्रवासे
पायान्मृगव्याध उदार शक्तिः ॥ 23॥
कल्पान्त कालोग्रपटु प्रकोप
स्फुटाट्टहासोच्चलिताण्ड कोशः ।
घोरारि सेनार्णवदुर्निवार
महाभयात् रक्षतु वीरभद्रः ॥ 24॥
पत्यश्वमातंग रथा(घटा)वरूथिनी
सहस्रलक्षायुत कोटि भीषणं ।
अक्षौहिणीनां शतमाततायिनां
छिन्द्यान्मृडो घोरकुठार धारया ॥ 25॥
निहन्तु दस्यून् प्रलयानलार्चिः
ज्वलत् त्रिशूलं त्रिपुरान्तकस्य ।
शार्दूल सिंहर्क्ष व्रिकादि हिंस्रान्
सन्त्रासयत्वीश धनुः पिनाकः ॥ 26॥
दुःस्वप्न दुःशकुन दुर्गति दौर्मनस्य
दुर्भिक्ष दुर्व्यसन दुस्सह दुर्यशांसि ।
उत्पाततापविषभीतिमसत् ग्रहार्तिं
व्याधींश्चनाशयतु मे जगतामधीशः ॥ 27॥

ॐ नमो भगवते सदाशिवाय
सकल तत्वात्मकाय
सकलतत्व विदूराय
सकललोकैक कर्त्रे
सकललोकैक भर्त्रे
सकललोकैक संहर्त्रे
सकललोकैक गुरवे
सकललोकैक साक्षिणे
सकलनिगमगुह्याय
सकललोकैक वरप्रदाय
सकल दुरितार्ति भञ्जनाय
सकल जगद भयङ्कराय
सकललोकैक शङ्कराय
शशाङ्क शेखराय
शाश्वत निजावासाय
निरावासाय
निराभासाय
निरामयाय
निरातङ्काय
निष्कळङ्काय
निष्प्रपञ्चाय
निर्द्वन्द्वाय
निस्संगाय
निर्ममाय
निर्मलाय
निर्गुणाय
निरुपम विभवाय
निराधाराय
नित्य शुद्ध बुद्ध परिपूर्ण सच्चिदानन्दाद्वयाय
परमशान्त प्रकाशाय
तेजोरूपाय

तेजोमयाय
तेजोऽधिपतये
जय जय रुद्र महारुद्र महारौद्र भद्रावतार
महाभैरव, कालभैरव, कल्पान्तभैरव, कपालमालाधर,
खट्वांग खड्गचर्म पाशाङ्कुश डमरू त्रिशूल चापबाण गदाशक्ति भिण्डिपाल–
तोमर मुसल मुद्गर पाश परिघ भुशुण्डी शतघ्नी चक्राद्यायुध कोटिभीषणकार,
सहस्रमुख दंष्ट्रा कराळवदन,
विकटाट्टहास, विस्फोटित ब्रह्माण्डमण्डल,
नागेन्द्रकुण्डल, नागेन्द्रहार, नागेन्द्रवलय,नागेन्द्रचर्मधर
म्रित्युञ्जय, त्र्यंबक, त्रिपुरान्तक, गंगाधर,
विरूपाक्ष, विश्वेश्वर, वृषभवाहन, विषविभूषण,
विश्वरूप, विश्वतोमुख, सर्वतोमुख
मां रक्ष रक्ष, ज्वलज्वल, प्रज्वल प्रज्वल,
महामृत्यु अपमृत्यु भयं नाशयनाशय,
रोगभयं उत्सादयोत्सादय,
विषसर्पभयं शमय शमय,
चोरान् मारय मारय,
मम शत्रून् उच्चाटयोच्चाटय,
शूलेन विदारय विदारय,
कुठारेण भिन्धि भिन्धि,
खड्गेन छिन्धि छिन्धि,
खट्वाङ्गेन विपोधय विपोधय,
मुसलेन निष्पेषय निष्पेषय,
बाणैः संताडय संताडय,
रक्षांसि भीषय भीषय,
भूतानि विद्रावय विद्रावय,
कूष्माण्ड भूत वेताळ मारीच–
ब्रह्म राक्षसगणान् संत्रासय संत्रासय,
मम अभयं कुरु कुरु,
वित्रस्तं मां आश्वासय आश्वासय,
दुःखातुरं मां आनन्दय आनन्दय,

क्षुत्त्रिष्णार्तं मां आप्यायय आप्यायय,
नरक भयान् मां उद्धरयोद्धराय,
अमृत कटाक्ष वीक्षणेन मां संजीवय संजीवय,
शिवकवचेन मां आच्छादय आच्छादय,
म्रित्युंजय त्र्यंबक सदाशिव परमशिव नमस्ते नमस्ते ॥

ऋक्षभ उवाच ---
इत्येतत्परमं शैवं कवचं व्याहृतं मया ।
सर्व बाधा प्रशमनं रहस्यं सर्व देहिनां ॥ 1
य: सदा धारयेन्मर्त्य: शैवं कवचमुत्तमं ।
न तस्य जायते क्वापि भयं शंभोरनुग्रहात् ॥ 2
क्षीणायु: प्राप्त मृत्युर्वा महारोगहतोऽपि वा ।
सद्य: सुखमवाप्नोति दीर्घमायुश्च विन्दति ॥ 3
सर्व दारिद्य शमनं सौमाङ्गल्य विवर्धनं ।
यो धत्ते कवचं शैवं स देवैरपि पूज्यते ॥ 4
महापातक संघातैः मुच्यते चोपपातकै: ।
देहान्ते मुक्तिमाप्नोति शिववर्मानुभावत: ॥ 5
त्वमपि श्रद्दया वत्स शैवं कवचमुत्तमं ।
धारयस्व मया दत्तं सद्य: श्रेयो ह्यवाप्स्यसि ॥ 6

महादेवं महेशानं महेश्वरमुमापतिं ।
महासेनगुरुं वन्दे महाभय निवारणं ॥ 1
शिवं शिवकरं शान्तं शिवात्मानं शिवोत्तमं ।
शिवमार्ग प्रणेतारं प्रणतोस्मि सदाशिवं ॥ 2
गौरीवल्लभ कामारे काळकूट विषाशन ।
मामुद्धर भवांभोधे त्रिपुराघ्नान्त कान्तक ॥ 3
म्रित्युञ्जयाय रुद्राय नीलकण्ठाय शंभवे ।
अमृतेशाय शर्वाय महादेवाय ते नम: ॥ 4
क्रिपासमुद्रं सुमुखं त्रिनेत्रं
जडाधरं पार्वति वामभागं ।
सदाशिवं रुद्रमनन्त रूपं

चिदंबरेशं ह्दिदि भावयामि ॥ 5
गजाननं भूत गणाति सेवितं
कपित्थजं भूफलसार भक्षितं ।
उमासुतं शोक विनाश कारणं
नमामि विघ्नेश्वर पादपङ्कजं ॥ 6
षडाननं कुङ्कुम रक्त वर्णं
महामतिं दिव्यमयूर वाहनं ।
रुद्रस्य सूनुं सुरसैन्यनाथं
गुहं सदा शरणमहं प्रपद्ये ॥ 7
षण्मुखं च गणाधीशं सांबं च परमेश्वरं ।
मम दुःख विनाशाय सन्ततं चिन्तयाम्यहं ॥ 8
भूतनाथ सदानन्द सर्वभूत दयापर ।
रक्ष रक्ष महाबाहो शास्त्रे तुभ्यं नमोनमः ॥ 9
सुमीनाक्षी सुन्दरेशौ भक्तकल्प महीरुहौ ।
तयोरनुग्रहो यत्र तत्र शोको न विद्यते ॥ 10

## Indrakshi Stotram

श्री गणेशाय नमः श्री गुरुभ्यो नमः श्री शारदाम्बिकायै नमः
हरिः ॐ
मातर्मे मधुकैटभघ्नि महिष प्राणापहारोद्यमे
हेला–निर्मित–धूम्रलोचन वधे हे चण्डमुण्डार्दिनि ।
निश्शेषीकृत रक्तबीजदनुजे नित्ये निशुम्भापहे
शुम्भध्वंसिनि संहराशु दुरितं दुर्गे नमस्तेऽम्बिके ॥

॥ इन्द्राक्षी स्तोत्रम् ॥
ध्यानं
नेत्राणां दशभिश्शतैः परिवृतां अत्युग्र–चर्माम्बरां
हेमाभां महतीं विलम्बित–शिखा–मामुक्त–केशान्विताम् ।
घण्टामण्डित–पादपद्मयुगळां नागेन्द्र–कुम्भस्तनीं
इन्द्राक्षीं परिचिन्तयामि मनसा कल्पोक्त सिद्धिप्रदाम् ॥ 1॥

इन्द्राक्षीं द्विभुजां देवीं पीतवस्त्र–द्वयान्विताम् ।
वामहस्ते वज्रधरां दक्षिणेन वरप्रदाम् ॥ 2॥
इन्द्राक्षीं सहयुवतीं नानालङ्कार–भूषिताम् ।
प्रसन्न–वदनाम्बोजां अप्सरोगण–सेविताम् ॥ 3॥

इन्द्र उवाच ।

इन्द्राक्षी नामसा देवी, दैवतैः समुदाहृता ।
गौरी शाकम्भरी देवी दुर्गा नाम्नीति विश्रुता ॥ 4॥
कात्यायनी महादेवी चण्डघण्टा (चन्द्रघण्टा) महातपाः ।
सावित्री साचगायत्री ब्रह्माणी ब्रह्मवादिनी । 5॥
नारायणी भद्रकाळी रुद्राणी कृष्णपिङ्गला ।
अग्निज्वाला रौद्रमुखी काळरात्री तपस्विनी ॥ 6॥
मेघस्वना सहस्राक्षी विकटाङ्गी जडोदरी ।
महोदरी मुक्तकेशी घोररूपा महाबला ॥ 7॥
अजिता भद्रदाऽनन्ता रोगहन्त्री शिवप्रिया ।
शिवदूती कराळी च प्रत्यक्ष–परमेश्वरी ॥ 8॥
महिषासुर–संहन्त्री चामुण्डासुर मर्दिनी ।
इन्द्राणी चेन्द्ररूपा च इन्द्रशक्तिः परायणी ॥ 9॥
सदा संमोहिनी देवी सुन्दरी भुवनेश्वरी ।
वाराही नारसिंही च भीमा भैरवनादिनी ॥ 10॥
श्रुतिः स्मृतिर्धृतिर्मेधा विद्या लक्ष्मीः सरस्वती ।
अनन्ता विजयाऽपर्णा मानस्तोकाऽपराजिता ॥ 11॥
भवानी पार्वती दुर्गा हैमवत्यम्बिका शिवा ।
शिवा भवानी रुद्राणी शङ्करार्धशरीरिणी ॥12॥
ऐरावत गजारूढा वज्रहस्ता वरप्रदा ।
वाञ्छितार्थ प्रदादेवि सुप्रसन्ना महेश्वरी । 13॥
एतैर्नाम पदैर्दिव्यैः स्तुता शक्रेण धीमता ॥
आयुरारोग्यमैश्वर्यं अपमृत्यु–भयापहम् ॥14॥
क्षयापस्मार–कुष्ठादि–तापज्वर–निवारणम् ।
शीतज्वर–निवारणं, उष्णज्वर–निवारणम् ॥15॥

सर्वज्वर–निवारणं, सर्वरोग–निवारणम् ।
सर्वशत्रु विनाशनं , सर्वमङ्गळ वर्धनम् ॥16॥
एतत् स्त्रोत्रं जपेन्नित्यं सर्वव्याधि निवारणम् ।
शतमावर्त्तयेद्यस्तु मुच्यते व्याधि बन्धनात् ॥ 17
आवर्तयन्–सहस्रं तु लभते वाञ्छितं फलम् ।
रणे राजभये चोरे सर्वत्र विजयी भवेत् ॥ 18॥
सर्वमंगळ–मांगल्ये शिवे सर्वार्थ–साधिके ।
शरण्ये त्रियम्बके देवि नारायणि नमोस्तुते ॥ 19॥
सर्वस्वरूपे सर्वेशि सर्व शक्ति समन्विते
भयेभ्यस्त्राहिनो देवी दुर्गा देवि नमोस्तुते ॥ 20॥
शरणागत दीनार्त्त परित्राण परायणे
सर्वस्यार्ति हरेदेवि नारायणी नमोस्तुते ॥ 21॥
सर्वबाधा प्रशमनं त्रैलोकस्याखिलेश्वरि
एवमेव त्वयाकार्यं अस्मत् वैरि विनाशानम् ॥ 22॥
यदक्षरं पदभ्रष्टं मात्राहीनं तु यत्भवेत्
तत्सर्वं क्षम्यतां देवि नारायणी नमोस्तुते ॥ 23॥
विसर्ग बिन्दुमात्राणि पदपादाक्षराणि च
न्यूनानि चातिरिक्तानि क्षमस्व परमेश्वरी ॥ 24॥
अन्यथा शरणं नास्ति त्वमेव शरणं मम
तस्मात् कारुण्य भावेन रक्ष रक्ष महेश्वरी ॥25॥

ॐ मृत्योस्तुल्यं त्रिलोकीं ग्रसितुमतिरसात्
निस्सृताः किंनु जिह्वाः ।
किं वा कृष्णांघ्रि पद्मद्युतिभिररुणिता
विष्णु पद्याः पदव्यः ॥

यदन्ति यश्च दूरके भयं विन्दति मामिह पवमानवितज्जहि ।
संसृष्टं धनमुभयं समाकृतमस्मभ्यं धत्तां वरुणश्च मन्युः ।
भियं दधाना हृदयेषु शत्रवः पराजितासो अपनिलयन्ताम् ॥

ॐ दुर्गां शरणमहं प्रपध्ये,

अनुकूलं मे प्रयच्छ प्रयच्छ,
प्रतिकूलं मे नाशय नाशय,
समस्तरोगान् नाशय नाशय,
समस्त शत्रून् उच्छाडयोच्छाडय,
आपदो नाशय नाशय,
संपदो वर्धय वर्धय,
सकल चिन्तित मनोरथान् साधय साधय,
विपरीतं यदुत्थितं भयं तत्सर्वं शमय शमय स्वाहा ॥

॥ तन्त्री करणम् ॥
ॐ श्रीं ह्रीं दुं दुर्गे भगवति दुःखं शमय शमय,
रोगं शमय शमय, भीतिं शमय शमय, आयुर्वर्द्धय वर्द्धय, दुं दुर्गां शरणमहं प्रपद्ये ।
ॐ प्राप्ता सन्ध्याः स्मररेः स्वयमुतनुतिभिः तिस्र इत्यूह्यमानाः ।
देवैर्देव्याः त्रिशूलक्षत महिषजुषो रक्तधारा जयन्ति ॥

ॐ रोगानशेषानपहंसि तुष्टा रुष्टातु कामान् सकलानभीष्टान् ।
त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥
ॐ राजराजेश्वर्यै नमः, हरिः ॐ
शुभं मङ्गळम् ॥

## Sri Dakshinamurthy Dhyana Slokam

### श्री दक्षिणामूर्ति स्तोत्रम्–ध्यानम्

मौन–व्याख्या प्रकटित परब्रह्म तत्त्वं युवानं
वर्षिष्ठान्ते वसदृषि गणैः आवृतं ब्रह्म–निष्ठैः ।
आचार्येन्द्रं कर–कलित चिन्मुद्रं आनन्द–रूपं
स्वात्मारामं मुदित–वदनं दक्षिणामूर्तिमीडे ॥ 1 ॥

वटविटपि समीपे भूमिभागे निषण्णं
सकल मुनि–जनानां ज्ञान–दातारमारात् ।
त्रिभुवन–गुरुमीशं दक्षिणामूर्तिदेवं
जनन–मरण दुःख–च्छेद दक्षं नमामि ॥ 2 ॥

यस्यान्तर्-नादिमध्यं न हि कर-चरण नाम गोत्रं न सूत्रं
नो जातिर्-नैव वर्णा न भवति पुरुषो न नपुंसं नैव च स्त्री ।
नाकारं नैवकारं नहि जनि मरणं नास्ति पुण्यं न पापम्
तत्वं नो तत्वमेकं सहज समरसं सद्गुरुं तं नमामि ॥ 3 ॥

चित्रं वट-तरोर्मूले वृद्धाः शिष्या गुरुर्युवा ।
गुरोस्तु मौनं व्याख्यानं शिष्यास्तु च्छिन्न-संशयाः ॥ 4 ॥

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुस्साक्षात् परं ब्रह्म तस्मै श्री गुरवे नमः ॥ 5 ॥

निधये सर्व विद्यानां भिषजे भव रोगिणाम् ।
गुरवे सर्व लोकानां दक्षिणामूर्तये नमः ॥ 6 ॥

ॐ नमः प्रणवार्थाय शुद्धज्ञानैक मूर्तये ।
निर्मलाय प्रशान्ताय दक्षिणामूर्तये नमः ॥ 7 ॥

चिद्घनाय महेशाय वटमूलनिवासिने ।
सच्चिदानन्द रूपाय दक्षिणामूर्तये नमः ॥ 8॥

ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने ।
व्योमवद्-व्याप्तदेहाय दक्षिणामूर्तये नमः ॥ 9 ॥

## Sri Dakshinamurthy Stotram

श्रीदक्षिणामूर्तिस्तोत्रं

विश्वं दर्पण-दृश्यमान-नगरी तुल्यं निजान्तर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया ।
यः साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ 1 ॥

बीजस्यान्तरिवाङ्कुरो जगदिदं प्राङ्-निर्विकल्पं पुनः
मायाकल्पित-देश-काल-कलना-वैचित्र्य-चित्रीकृतम् ।
मायावीव विजृंभयत्यपि महायोगीव यःस्वेच्छया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ 2 ॥

यस्यैव स्फुरणं सदात्मकं असत्कल्पार्थकं भासते

साक्षात् तत्त्वमसीति वेद–वचसा यो बोधयत्याश्रितान् ।
यत्साक्षात्करणात् भवेन्न पुनरावृत्तिर्भवांभोनिधौ
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ 3 ॥

नानाच्छिद्र–घटोदर–स्थित–महादीप–प्रभा–भास्वरं
ज्ञानं यस्य तु चक्षुरादि–करणद्वारा बहिः स्पन्दते ।
जानामीति तमेव भान्तमनुभात्येतत् समस्तं जगत्
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ 4 ॥

देहं प्राणमपीन्द्रियाण्यपि चलां बुद्धिं च शून्यं विदुः
स्त्री–बालान्ध–जडोपमास्त्वहमिति भ्रान्ता भृशं वादिनः ।
माया–शक्ति–विलास–कल्पित–महा–व्यामोह–संहारिणे
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ 5 ॥

राहु–ग्रस्त दिवाकरेन्दु सदृशः माया–समाच्छादनात्
सन्मात्रः–करणोप–संहरणतो योऽभूत्सुषुप्तः पुमान् ।
प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ 6 ॥

बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि
व्यावृत्तास्वनु–वर्तमानमहमित्यन्तस्स्फुरन्तं सदा ।
स्वात्मानं प्रकटीकरोति भजतां यो मुद्रया भद्रया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ 7 ॥

विश्वं पश्यति कार्य–कारणतया स्वस्वामिसम्बन्धतः
शिष्याचार्यतया तथैव पितृ–पुत्राद्यात्मना भेदतः ।
स्वप्ने जाग्रति वा य एष पुरुषः माया–परिभ्रामितः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ 8 ॥

भूरम्भांस्यनलोऽनिलोऽम्बर–महर्नाथो हिमांशुः पुमान्
इत्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् ।
नान्यत् किञ्चन विद्यते विमृशतां यस्मात् परस्माद्विभोः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ 9 ॥

सर्वात्मत्वमिति स्फुटी–कृतमिदं यस्मादमुष्मिंस्तवे
तेनाऽस्य श्रवणात्तदर्थ–मननात् ध्यानाच्च संकीर्तनात् ।
सर्वात्मत्व–महाविभूति–सहितं स्यादीश्वरत्वं स्वतः
सिध्येत्तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतम् ॥ 10 ॥

प्रकाशात्मिकया शक्त्या, प्रकाशानां प्रभाकरः
प्रकाशयति यो विश्वं, प्रकाशोयं प्रकाश्यताम् ॥

**Sivamaanasa Pooja**

॥ शिवमानसपूजा ॥

रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्याम्बरं
नानारत्न–विभूषितं मृगमदा–मोदाङ्कितं चन्दनम् ।
जातीचम्पक–बिल्वपत्ररचितं पुष्पं च धूपं तथा
दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् ॥ 1॥

सौवर्णे नवरत्न–खण्डरचिते पात्रे घृतं पायसं
भक्ष्यं पञ्चविधं पयोदधियुतं रम्भाफलं पानकम् ।
शाकानां–अयुतं जलं रुचिकरं कर्पूर–खण्डोज्ज्वलं
ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु ॥ 2॥

छत्रं चामरयोर्युगं व्यजनकं च आदर्शकं निर्मलं
वीणा–भेरि–मृदङ्ग–काहलकला गीतं च नृत्यं तथा ।
साष्टाङ्गं प्रणतिः स्तुतिर्बहुविधा ह्येतत्समस्तं मया
सङ्कल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ॥ 3॥

आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विषयोप–भोगरचना निद्रा समाधिस्थितिः ।
सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो
यद्यत्–कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥ 4॥

करचरण कृतं वाक्कायजं कर्मजं वा ।
श्रवणनयनजं वा मानसं वापराधम् ।
विहितमविहितं वा सर्वमेतत्क्षमस्व ।
जय जय करुणाब्धे श्रीमहादेवशम्भो ॥ 5॥

इति श्रीमच्छङ्कराचार्य विरचिता शिवमानसपूजा समप्ता ॥

**Sri Rama Bhujangam**

॥ रामभुजङ्ग स्तोत्र ॥

विशुद्धं परं सच्छिदानन्दरूपम्
गुणाधारमाधारहीनं वरेण्यम् ।
महान्तं विभान्तं गुहान्तं गुणान्तं
सुखान्तं स्वयं धाम रामं प्रपद्ये ॥ 1 ॥
शिवं नित्यमेकं विभुं तारकाख्यं
सुखाकारमाकारशून्यं सुमान्यं ।
महेशं कलेशं सुरेशं परेशं
नरेशं निरीशं महीशं प्रपद्ये ॥ 2 ॥
यदावर्णयत्कर्णमूलेऽन्तकाले
शिवो राम रामेति रामेति काश्याम् ।
तदेकं परं तारकब्रह्मरूपं
भजेऽहं भजेऽहं भजेऽहं भजेऽहम् ॥ 3 ॥
महारत्नपीठे शुभे कल्पमूले
सुखासीनमादित्यकोटिप्रकाशम् ।
सदा जानकीलक्ष्मणोपेतमेकं
सदा रामचन्द्रं भजेऽहं भजेऽहम् ॥ 4 ॥
क्वणद्रत्नमन्जीरपादारविन्दम्
लसन्मेखलाचारुपीताम्बराढ्यम् ।
महारत्नहारोल्लसत् कौस्तुभाङ्गं
नदच्चञ्चरीमञ्जरीलोलमालम् ॥ 5 ॥
लसच्चन्द्रिकास्मेरशोणाधराभम्
समुद्यत्पतङ्गेन्दुकोटिप्रकाशम् ।
नमद्ब्रह्मरुद्रादिकोटीररत्न
स्फुरत्कान्तिनीराजनाराधिताङ्घ्रिम् ॥ 6 ॥
पुरः प्राञ्जलीनाञ्जनेयादिभक्तान्
स्वचिन्मुद्रया भद्रया बोधयन्तम् ।
भजेऽहं भजेऽहं सदा रामचन्द्रं
त्वदन्यं न मन्ये न मन्ये न मन्ये ॥ 7 ॥
यदा मत्समीपं कृतान्तः समेत्य
प्रचण्डप्रतापैर्भटैर्भीषयेन्माम् ।
तदाविष्करोषि त्वदीयं स्वरूपं
तदापत्प्रणाशं सकोदण्डबाणम् ॥ 8 ॥
निजे मानसे मन्दिरे संनिधेहि
प्रसीद प्रसीद प्रभो रामचन्द्र ।
ससौमित्रिणा कैकेयीनन्दनेन
स्वशक्त्यानुभक्त्या च संसेव्यमान ॥ 9 ॥
स्वभक्ताग्रगण्यैः कपीशैर्महीशैः
अनीकैरनेकैश्च राम प्रसीद ।
नमस्ते नमोऽस्त्वीश राम प्रसीद
प्रशाधि प्रशाधि प्रकाशं प्रभो माम् ॥ 10 ॥

त्वमेवासि दैवं परं मे यदेकं
सुचैतन्यमेतत्त्वदन्यं न मन्ये ।
यतोऽभूदमेयं वियद्वायुतेजो
जलोर्व्यादिकार्यं चरं चाचरं च ॥ 11 ॥
नमः सच्चिदानन्दरूपाय तस्मै
नमो देवदेवाय रामाय तुभ्यम् ।
नमो जानकीजीवितेशाय तुभ्यं
नमः पुण्डरीकायताक्षाय तुभ्यम् ॥ 12 ॥
नमो भक्तियुक्तानुरक्ताय तुभ्यं
नमः पुण्यपुञ्जैकलभ्याय तुभ्यम् ।
नमो वेदवेद्याय चाद्याय पुंसे
नमः सुन्दरायेन्दिरावल्लभाय ॥ 13 ।
नमो विश्वकर्त्रे नमो विश्वहर्त्रे
नमो विश्वभोक्त्रे नमो विश्वमात्रे ।
नमो विश्वनेत्रे नमो विश्वजेत्रे
नमो विश्वपित्रे नमो विश्वमात्रे ॥ 14 ॥
शिलापि त्वदङ्घ्रिक्षमासङ्गिरेणु
प्रसादाद्धि चैतन्यमाधत्त राम ।
नरस्त्वत्पदद्वन्द्वसेवाविधानात्
सुचैतन्यमेतेति किं चित्रमद्य ॥ 15 ॥

पवित्रं चरित्रं विचित्रं त्वदीयं
नरा ये स्मरन्त्यन्वहं रामचन्द्र ।
भवन्तं भवान्तं भरन्तं भजन्तो
लभन्ते कृतान्तं न पश्यन्त्यतोऽन्ते ॥ 16 ॥
स पुण्यः स गण्यः शरण्यो ममायं
नरो वेद यो देवचूडामणिं त्वाम् ।
सदाकारमेकं चिदानन्दरूपं
मनोवागगम्यं परन्धाम राम ॥ 17 ॥
प्रचण्डप्रतापप्रभावाभिभूत
प्रभूतारिवीर प्रभो रामचन्द्र ।
बलं ते कथं वर्ण्यतेऽतीव बाल्ये
यतोऽखण्डि चण्डीशकोदण्डदण्डः ॥ 18 ॥
दशग्रीवमुग्रं सपुत्रं समित्रं
सरिद्दुर्गमध्यस्थरक्षोगणेशम् ।
भवन्तं विना राम वीरो नरो वा
ऽसुरो वाऽमरो वा जयेत्कस्त्रिलोक्याम् ॥ 19 ॥
सदा राम रामेति रामामृतं ते
सदाराममानन्दनिष्यन्दकन्दम् ।
पिबन्तं नमन्तं सुदन्तं हसन्तं
हनूमन्तमन्तर्भजे तं नितान्तम् ॥ 20 ॥

सदा राम रामेति रामामृतं ते
सदाराममानन्दनिष्यन्दकन्दम् ।
पिबन्नन्वहं नन्वहं नैव मृत्योः
बिभेमि प्रसादादसादात्तवैव ॥ 21 ॥
असीतासमेतैरकोदण्डभूशैः
असौमित्रिवन्द्यैरचण्डप्रतापैः ।
अलङ्केशकालैरसुग्रीवमित्रैः
अरामाभिधेयैरलं देवतैर्नः ॥ 22 ॥

अवीरासनस्थैरचिन्मुद्रिकाढ्यैः
अभक्ताञ्जनेयआदितत्त्वप्रकाशैः ।
अमन्दारमूलैरमन्दारमालैः
अरामाभिधेयैरलं देवतैर्नः ॥ 23 ॥
असिन्धुप्रकोपैरवन्द्यप्रतापैः
अबन्धुप्रयाणैरमन्दस्मिताढ्यैः ।
अदण्डप्रवासैरखण्डप्रबोधैः
अरामभिदेयैरलं देवतैर्नः ॥ 24 ॥
हरे राम सीतापते रावणारे
खरारे मुरारे ऽसुरारे परेति ।
लपन्तं नयन्तं सदाकालमेव
समालोकयालोकयाशेषबन्धो ॥ 25 ॥

नमस्ते सुमित्रासुपुत्राभिवन्द्य
नमस्ते सदा कैकयीनन्दनेड्य ।
नमस्ते सदा वानराधीशवन्द्य
नमस्ते नमस्ते सदा रामचन्द्र ॥ 26 ॥
प्रसीद प्रसीद प्रचण्डप्रताप
प्रसीद प्रसीद प्रचण्डारिकाल ।
प्रसीद प्रसीद प्रपन्नानुकम्पिन्
प्रसीद प्रसीद प्रभो रामचन्द्र ॥ 27 ॥
भुजङ्गप्रयातं परं वेदसारं
मुदा रामचन्द्रस्य भक्त्या च नित्यम् ।
पठन् सन्ततं चिन्तयन् स्वान्तरङ्गे
स एव स्वयं रामचन्द्रः स धन्यः ॥ 28 ॥

॥ इति श्री शङ्कराचार्य विरचितं
श्रीरामभुजङ्ग प्रयात स्तोत्रं सम्पूर्णम्॥

## Sri Rama Mangala Stotram

श्री राम मङ्गळश्लोकाः ॥

मङ्गळं कोसलेन्द्राय महनीय गुणात्मने
चक्रवर्ति तनूजाय सार्वबौमाय मङ्गळम् ॥ 1
वेदवेदान्त वेद्याय मेघ श्यामल मूर्तये
पुंसां मोहन रूपाय पुण्यश्लोकाय मङ्गळम् ॥ 2
विश्वामित्रान्तरङ्गाय मिथिला नगरीपते
भाग्यानां परिपाकाय भव्यरूपाय मङ्गळम् ॥ 3
पितृभक्ताय सततं भ्रातृभिः सह सीतया
नन्दिताखिल लोकाय रामभद्राय मङ्गळम् ॥ 4
त्यक्त साकेत वासाय चित्रकूट विहारिणे
सेव्याय सर्वयमिनां धीरोदाराय मङ्गळम् ॥ 5
सौमित्रिणा च जानक्या चाप बाणासि धारिणे
संसेव्याय सदा भक्त्या स्वामिने मम मङ्गळम् ॥ 6
दण्डकारण्य वासाय खण्डितामर शत्रवे
गृध्रराजाय भक्ताय मुक्तिदायास्तु मङ्गळम् ॥ 7
सादरं शबरी दत्त फल मूलाभिलाषिणे
सौलभ्य परिपूर्णाय सत्वोद्रिक्ताय मङ्गळम् ॥ 8
हनूमत् समवेताय हरीशाभीष्ट दायिने
वालि प्रमथनायास्तु महाधीराय मङ्गळम् ॥ 9
श्रीमते रघुवीराय सेतूल्लङ्घित सिन्धवे
जित राक्षस राजाय रणधीराय मङ्गळम् ॥ 10
आसाद्य नगरीं दिव्यां अभिषिक्ताय सीतया
राजाधि राज राजाय रामभद्राय मङ्गळम् ॥ 11
ब्रह्मादि देव सेव्याय ब्राह्मण्याय महात्मने
जानकी प्राणनाथाय रगुनाथाय मङ्गळम् ॥ 12
मङ्गलाशासनपरैः मदाचार्य पुरोगमैः
सर्वैश्च पूर्वैराचार्यै सत्कृतायास्तु मङ्गळम् ॥ 13

## Nirvana Shatakam

॥ निर्वाण षटकम्  ॥

मनो बुद्धि–अहंकार चित्तानि नाहं
न च श्रोत्र जिह्वे न च घ्राण नेत्रे ।
न च व्योम भूमिर्न तेजो न वायु:
चिदानन्दरूप: शिवोऽहं शिवोऽहम् ॥ 1 ॥

न च प्राणसंज्ञो न वै पञ्चवायु:
न वा सप्तधातुर्न वा पञ्चकोशा: ।
न वाक्पाणिपादौ न चोपस्थपायू
चिदानन्दरूप: शिवोऽहं शिवोऽहम् ॥2 ॥

न मे द्वेषरागौ न मे लोभमोहौ
मदो नैव मे नैव मात्सर्य भाव: ।
न धर्मो न चार्थो न कामो न मोक्ष:
चिदानन्दरूप: शिवोऽहं शिवोऽहम् ॥ 3॥

न पुण्यं न पापं न सौख्यं न दु:खं
न मन्त्रो न तीर्थं न वेदा न यज्ञा: ।
अहं भोजनं नैव भोज्यं न भोक्ता
चिदानन्दरूप: शिवोऽहं शिवोऽहम् ॥4 ॥

न मे मृत्यु शङ्का न मे जातिभेद:
पिता नैव मे नैव माता न जन्म ।
न बन्धुर्न मित्रं गुरुर्नैव शिष्य:
चिदानन्दरूप: शिवोऽहं शिवोऽहम् ॥5 ॥

अहं निर्विकल्पो निराकार रूप:
विभुर्व्याप्य सर्वत्र सर्वेन्द्रियाणाम् ।
सदा मे समत्वं न मुक्तिर्न बन्ध:
(न चासङ्गतं नैव मुक्तिर्नमेय:)
चिदानन्दरूप: शिवोऽहं शिवोऽहम् ॥6 ॥

## Totakashtakam

॥ तोटकाष्टकम्  ॥

तोटकाचार्य

विदिताखिल–शास्त्र सुधा जलधे  महितोपनिषत् कथितार्थनिधे ।
हृदये कलये विमलं चरणं  भव शङ्कर देशिक मे शरणम् ॥ 1॥

करुणा–वरुणालय पालय मां  भवसागर दु:खविदून हृदम् ।
रचयाखिल दर्शन तत्त्वविदं  भव शङ्कर देशिक मे शरणम् ॥ 2॥

भवता जनता सुहिता भविता  निजबोध–विचारण चारुमते ।
कलयेश्वर जीव विवेकविदं  भव शङ्कर देशिक मे शरणम् ॥ 3॥

भव एव भवानिति मे नितरां समजायत चेतसि कौतुकिता ।
मम वारय मोह महाजलधिं  भव शङ्कर देशिक मे शरणम् ॥ 4॥

सुकृतेऽधिकृते बहुधा भवतो   भविता समदर्शन लालसता ।
अतिदीनमिमं परिपालय मां  भव शङ्कर देशिक मे शरणम् ॥ 5॥

जगतीमवितुं कलिताकृतयो विचरन्ति महा महसच्छलतः ।
अहिमांशुरिवात्र विभासि गुरो  भव शङ्कर देशिक मे शरणम् ॥ 6॥

गुरुपुङ्गव–पुङ्गव केतन ते समतामयतां न हि कोऽपि सुधीः ।
शरणागत वत्सल तत्त्वनिधे  भव शङ्कर देशिक मे शरणम् ॥ 7॥

विदिता न मया विशदैक कला न च किञ्चन काञ्चनमस्ति गुरो ।
द्रुतमेव विधेहि कृपां सहजां  भव शङ्कर देशिक मे शरणम् ॥ 8॥

**Mangala Aarathi**

श्री गणेशाय नमः । श्री गुरुभ्यो नमः ।

श्री शारदाम्बिकायै नमः ।

बहुग्वै बह्वश्वायै बह्वजाविकायै ।
बहुव्रीहियवायै बहुमाषतिलायै ।
बहुहिरण्यायै बहुहस्तिकायै ।
बहुदासपूरुषायै रयिमत्यै पुष्टिमत्यै ।
बहुरायस्पोषायै राजाऽस्तु ॥

हरिः ॐ

TAITTIRIYA BRAHMANAM
( Aswamedha Prasnam - 18th Anuvakam)